CC-O. In Public Domain. Digitized by eGangotri

॥ श्रीः ॥

श्रीगङ्गाकल्पोक्तपूजाविधिः

सम्: वे। ब्र। श्री। मित्तूरु श्रीनिवास भट्टः, एम्. ए.

श्रीगङ्गा

श्रीयमुना

ब्रह्मश्री मित्तूरु पुरोहित तिम्मय्य भट्ट संप्रतिष्ठानम् (रि.)
अनूचाननिलयः, ग्रामः इड्किदु – ५७४ २२०, बण्ट्वालतालूकः, द. क., कर्णाटकः

Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

विंशोत्सवकृतिकुसुमम्

****

श्रीगङ्गाकल्पोक्तपूजाविधिः

सम्पादकः

वे । ब्र । श्री । मित्तूरु श्रीनिवास भट्टः, एम्. ए.

ज्यौतिषशिरोमणिः

577 139

ब्रह्मश्री मित्तूरु पुरोहित तिम्मय्य भट्ट सम्प्रतिष्ठानम् (रि.)

अनूचाननिलयः

ग्रामः इड्किदु – ५७४ २२०, बण्ट्वालतालूकः, द. क., कर्णाटकः

स्थापनम् : १९९३

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

श्रीगङ्गाकल्पोक्तपूजाविधिः

संपादकः : वे । ब्र । श्री । मित्तूरु श्रीनिवास भट्टः, एम्. ए.
ज्यौतिषशिरोमणिः, श्रीशरामनिवासः, ग्रामः (पोस्ट्), अनन्ताडि
बण्ट्वाल तालूकः, द. क., ५७४ २५३, कर्णाटकः

प्रकाशकः : ब्रह्मश्री मित्तूरु पुरोहित तिम्मय्य भट्ट सम्प्रतिष्ठानम् (रि.)
अनूचाननिलयः, ग्रामः इड्किदु - ५७४ २२०
बण्ट्वाल तालूकः, द. क., स्थिर दूरवाणी : ०८२५१ - २८११०१

पुटसंख्या : xvi + 56

© सम्प्रतिष्ठानम्

ग्रन्थमूल्यम् : ३६/– Price : ₹ 36/-

प्रथममुद्रणम् : शा. श. १९३७ मन्मथनाम संवत्सरः क्रि.श. २०१५ सेप्टम्बर

पुस्तकानि : १०००

SHREE GANGA KALPOKTA POOJA VIDHIH

Edited by : **Ved. Mittur Shrinivasa Bhatta,** M.A.

Published by : **Brahmashree Mitturu Purohita Thimmayya Bhatta Samprathishthaana (R.)**
Anoochana Nilaya, P. O. Idkidu - 574 220, Bantwal, D. K.
+91 9483355101; Email : samprathishtaana@gmail.com

ग्रन्थसम्पादनमार्गदर्शनसमितिः

१. श्री पादेकल्लु नरसिंह भट्टः, करोपाडि
२. डा । पादेकल्लु विष्णु भट्टः, उडुपि
३. वे । ब्र । मित्तूरु श्रीनिवास भट्टः, अनन्ताडि
४. वे । ब्र । बोळन्तकोडि राम भट्टः, कोळ्यूरु
५. वे । ब्र । अमै अनन्तकृष्ण भट्टः, बेङ्गलूरु
६. वे । ब्र । मञ्जुळगिरि वेङ्कटरमण भट्टः, बेट्टम्पाडि

अक्षरसंयोजनं रक्षापुटविन्यासश्चः : श्रिमती जयलक्ष्मी एस्. जोयिस्

मुद्रणालयः : नागरल प्रिण्टर्स्, बेङ्गलूरु

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

VIMSHOTHSAVAKRITHIKUSUMA

****

SHREE GANGA KALPOKTA POOJA VIDHIH

Editor :

Ved. Mittur Shrinivasa Bhatta, M.A.

Jyothisha shiromani

BRAHMASHREE MITTURU PUROHITA THIMMAYYA BHATTA SAMPRATHISHTHAANA (R.)

Anoochana Nilaya

P. O. Idkidu - 574 220, Bantwal, D. K., Karnataka

ESTD. : 1993

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

SHREE GANGA KALPOKTA POOJA VIDHIH

Edited by : **Ved. Mittur Shrinivasa Bhatta,** M.A.

Published by: **Brahmashree Mitturu Purohita Thimmayya Bhatta Samprathishthaana (R.)**
Anoochana Nilaya
P. O. Idkidu - 574 220, Bantwal, D. K.
9483355101; Email : samprathishtaana@gmail.com

Pages : xvi + 56

© Samprathishtaanam

Price : ₹ 36/-

First Edition :
Sha. Ka. 1937 Manmatha Samvathsara, 2015 September

Copies : 1000

Editorial Advisory Committee :

1. Sri Padekallu Narasimha Bhatta, Karopadi
2. Dr. Padekallu Vishnu Bhatta, Udupi
3. Ved. Mittur Shrinivasa Bhatta, M.A., Ananthady
4. Ved. Bolanthakody Rama Bhatta, Kolyur
5. Ved. Amai Ananthakrishna Bhatta, Bengaluru
6. Ved. Manjulagiri Venkataramana Bhatta, Bettampady

DTP & Cover Design : Smt. Jayalakshmi S. Jois

Printed at : Nagarathna Printers, Bengaluru

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

प्रकाशकीयाः

परमपावनकाशीक्षेत्रतीर्थयात्रान्तरं गृहं प्रतिनिवर्त्य 'काशीसमाराधनं' इति धर्मकर्माचरणपद्धतिः । कर्मण्यस्मिन् गङ्गाजलाभिषेकपूर्वकशिवपूजनं तथा गङ्गापूजनं मुख्यम् । गङ्गातीर्थप्रसादादिकं (काशीपट्टसूत्रप्रदानपूर्वक बन्धनं) बन्धु-बान्धवानां दत्वा काशीतीर्थयात्रागमने असमर्थानां च यात्राफलस्वरूप मनस्समाधानकृत्यमपि अन्तर्गतं भवति । तथा नवोत्खात वापी, कूप, तडाग-प्रणाळवापी (बोर्वेल्) इत्यादि जललाभसमये केचन प्रतिसंवत्सरेऽपि गङ्गापूजां कुर्वन्ति । तत्काले पूजां कर्तुं आनुकूल्यार्थं 'गङ्गाकल्पोक्तपूजाविधिः' इदानीं प्रकाश्यते । पूर्वजैः लिखित (हस्त) पुस्तकं परिष्करणं कृत्वा सहस्रनामावलिः, अष्टोत्तरशतनामावलिः इत्यादि ग्रन्थान्तरात् स्वीकृत्य प्रयोगविधिः लिखितः ।

ग्रन्थस्य सम्पादकः वे.ब्र. मित्तूरु श्रीनिवास भट्टः । एषमहानुभावः ब्रह्म श्री मित्तूरु पुरोहित तिम्मय्य भट्ट महोदयानां पौत्रः इति महान् मोदः। एतस्मै कृतज्ञता । ग्रन्थस्पादनमार्गदर्शनसमितिस्थानां च नमनम् । ग्रन्थस्य परिशोधकानां डा. पादेकल्लु विष्णुभट्टमहोदयानां च कुतज्ञता ।

ग्रन्थस्यास्य प्रकाशनाय सम्पूर्णधनदानकर्तॄणां मित्तूरु पुरोहित शङ्करनारायण भट्टमहोदयानां सुपुत्राणां मित्तूरु (वाल्तजे) तिरुमलेश्वर भट्टानां आयुरारोग्यभाग्यप्राप्तिपूर्वक 'शास्त्रसेवायाः' सम्पूर्णफलं, श्री गङ्गामातुः पूर्णानुग्रहश्च भूयादिति आशास्महे ।

ग्रन्थोऽयं आस्तिकजनानां प्रयोजनमभूच्चेत् वयं कृतकृत्याः । वैदिकक्षेत्रे स्थिताः सर्वे पुस्तकमिदं स्वागतं कुर्वन्तु, इति विज्ञापयामः ।

इति

प्रकाशकाः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

मित्तूरु पुरोहित शङ्करनारायण भट्टः – श्रीमती पार्वती
जननम् : २८–२–१९१८ * स्वर्गमनम् : २७–२–१९९५

दि। मित्तूरु पुरोहित कृष्णभट्ट श्रीमती सरस्वती अम्म दम्पत्योः द्वौ सुपुत्रौ। ज्येष्ठ पुत्रः श्री मित्तूरु पुरोहित तिम्मय्य (तिरुमलेश्वर) भट्टः कनिष्ठः श्री मित्तूरु पुरोहित शङ्करनारायण भट्टः। दिनाङ्के : क्रि. श. २८–२–१९१८ जननम्।

बाल्ये प्राथमिकविद्याभ्यासानन्तरं स्वतीर्थरूप–पुरोहित कृष्ण भट्टेभ्यः एवं पितृव्यचरणेभ्यः संस्कृतज्यौतिषशास्त्रायोः निष्णात मित्तूरु नारायण शास्त्रिभ्यश्च अध्ययनसम्पन्नः। एषः संस्कृताध्ययनसमये पेरडाल महाजन संस्कृत महाविद्यालयः नीर्चालु तत्र महान् पण्डितः दर्भे नारायण शास्त्रिणां शिष्यो भूत्वा विद्यार्थि–दशायामेव बहुमुख प्रतिभां प्रदर्शितवान्। अनेकस्पर्धासु, संस्कृतनाटकेऽपि (अभिज्ञानशाकुन्तलनाटकं) नायकनायिकादि पात्राणि अभिनीय बहुजन प्रशंसनभाजनमभूत्। तस्मिन् काले तन्नाटकं मनोज्ञं सुप्रसिद्धमभूत् एतन्महाभागस्य अभिनयात्।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

नीर्चालु महाविद्यालये संस्कृतसाहित्यशिरोमणिपर्यन्तं अध्ययनसम्पन्नानन्तरं एषो महानुभागः कर्मकाण्डे प्रागल्भ्यं प्राप्य, पुरोहितः, ऋत्विक्, अध्ययनाध्यापन–यजन–याजन, दान–प्रतिग्रहा इति षट्कर्मनिरतोऽभूत् । वैदिके धर्मशास्त्रविषये च निष्णातेनानेन प्रबुद्धोपन्यासादिकं कृतम् ।

समाजे अत्यधिकात्मीयाः, अभिमानिनः, शिष्याश्च सम्प्राप्ताः। स्वसंस्कृतभाषाप्रावीण्यात् अनेक प्रयोगग्रन्थाः अधीताः । मनुस्मृतिः धर्मसिन्धुः–शारदातिलकं गृह्यसूत्रं बौधायनीयसूत्रं, आश्वलायन–सूत्रमित्यादि धर्मग्रन्थेषु, रामायण–महाभारत–श्रीमद्भागवत–महापुराणेत्यादि पुराणग्रन्थेषु च निष्णाताः । स्वपाण्डित्यात् वैदिकानां आनुकूल्यार्थं अनेकटिप्पण्यनेकानेकवैदिकक्रियाकर्मणां प्रयोगाणां सरल–सुलभ–सुस्पष्ट–सुललितस्वसुन्दरहस्ताक्षरैः प्रीत्यादरेण विलिख्य ददति स्म । वैदिकाः वैदिकविचारविमर्शे एतमेवाश्रयन्ति स्म । समस्यानां शास्त्राधारनिरूपणपूर्वकसिद्धान्तकरणविषये सिद्धहस्ताः । स्वाध्ययनचिन्तनाफलाध्यापने अत्यासक्ताः । किञ्चित् सङ्गीतज्ञानमप्युक्तः अनेकसंस्कृतश्लोकान्, ग्राम्यगीतानि, कीर्तनानि च विरच्य माधुर्य–लालित्य–लयबद्धता–सुरसता–सुकोमलता–सुश्राव्यतादि गुणविशेषैः गायन्ति स्म । अखण्डसुश्राव्यशङ्खनादकरणे निष्णातः ।

स्वतीर्थरूपस्य सुस्मरणे मित्तूरु पुरोहित कृष्ण भट्ट स्मारकग्रन्थमाला इति 'प्रकाशनं' संस्थाप्य तन्नामशीर्षके कन्नडसन्ध्याभाष्यं, अनुष्ठानदीपिका–भागः १, अनुष्ठानदीपिका–भागः २, विष्णुप्रोक्तशिवसहस्रनाम, कडेशिवालयमाहात्म्य सुलभसंस्कृतबोधकः, सत्यदत्तव्रतकथा, इत्याद्यनेकग्रन्थाः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

प्रकाशिताः । सन्ध्योपासनसम्बन्ध्यनेक-सविवर-सुस्पष्ट-शास्त्राधारयुक्तविद्वत्पूर्णकन्नडभाषायाः कन्नडसन्ध्याभाष्य (याजुषः) ग्रन्थरत्नं श्री श्री श्रीमज्जगद्गुरु शङ्कराचार्य सुरेश्वराचार्य ज्येष्ठशिष्याविच्छिन्नपरम्पराप्राप्त श्रीमद्राघवेन्द्रभारती श्रीचरणैः प्रशंसितम्। एवं कर्णाटकराज्ये विद्वद्भिः प्रोत्साहितं च। ग्रन्थेऽस्मिन्-उपोद्घातः, वेदाङ्गानि, सन्ध्योपासनं, गीर्वाणभाषा च, उपनयनशब्दार्थः, वैदिकता, भारतीयता, सन्ध्याविधिः, सन्ध्याशब्दार्थविचारः, सन्ध्याकालविचारः, सन्ध्यायाः मुख्यमध्यमाधमकालाः आचमनप्राणायाममन्त्रयोःविचारः, गायत्रीमन्त्रार्थाः सप्तदशविधाः वर्तन्ते । इत्याद्यनेकवैचारिकविषयाः प्रतिपाद्यन्ते । अध्ययनवत्-अध्यापनार्थमपि प्राधान्यं दत्तवतः महानुभावस्य शङ्करनारायणभट्टस्य शिष्याः अनेके । बहवः संस्कृताध्ययन-पूर्वापरप्रयोगपाठाध्ययन-सम्पन्नाः विख्याताः अभवन्। पुरोहिताः करिष्यमाण वैदिकप्रक्रियाणां अर्थज्ञानार्थं तत्सम्बधीसंस्कृताध्यनं कर्तव्यं इति बोधयन्ति स्म । स्पस्ट सुस्वरयुक्तमन्त्रोच्चारणं वैदिकप्रवरेषु अत्यावश्यकम्। धनार्थं पौरोहित्यमकरणीयम्। 'गुणलुब्धाः स्वयमेव सम्पदः' अतः काम-क्रोध-लोभ-मोह-मद-मात्सर्याणि-इति षड्वैरिणः जितवन्तः वैदिकाः भवेयुस्तदा सम्पदः स्वयमेव प्राप्नुवन्ति । यथा वागुच्यते तथाचरणं कालपरिपालनमपि । ते तद्वज्जीवनयापनं कृतवन्तः ।

मङ्गलूरुकलादर्शने, पुत्तूरुप्रदेशे श्रीसत्यसायी सेवासंस्थायां, अनेक अभिमानिजनैः बन्धुजनैश्च अनेकप्रदेशे सम्मानिताः एते वैदिकक्षेत्रे प्राप्तसमस्यानां परिहारसूचकाः 'वैद्याः' (वैदिक भिषक्) इति च गौरवं प्राप्तवन्तः । श्रीमद्भागवतमहापुराण-श्रीमद्रामयण-सत्यनारायणव्रतकथा इत्याद्यनेकप्रवचननिष्णताः ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अनेकप्रदेशेषु श्रीमद्भागवतसप्ताहयज्ञे अग्रगामीभूत्वा प्रातःमध्याह्न-सायङ्कालेषु वैविध्यमय-रसमय-सङ्गीत रागे श्लोकान् उच्चस्वरेण धीरश्रुत्या उच्चारयन्ति स्म । पुत्तूरु श्री महालिङ्गेश्वरदेवालये वार्षाधिककाले प्रति सोमवासरे प्रवचनं कृतवन्तः ।

सदा श्वेतवस्त्रधारिणः निर्मलमनस्काः, निष्कल्मषहृदयाश्च । एतेषां त्रयः पुत्राः पुत्र्यौ द्वे च । मध्ये वयसि पत्नीवियोगः । संसारसागरे क्लिष्टतमतरङ्गप्राप्तास्तथाऽपि ज्ञानप्लवगे तितीर्य बाह्यप्रपञ्चे सदा प्रसन्नमुखाः । तेषां ज्यैष्ठास्सर्वे 'तम्म' इत्यभिधानं दत्तवन्तः परन्तु अध्ययने-अध्यापने, वाग्मित्वे-ग्रन्थरचने च 'मित्तूरु पुरोहित शङ्करनारायणभट्टः' इति, बन्धुजनानां 'तम्मभाव-तम्मभट्ट'-तम्ममाव-तम्मप्पच्चि' इति, समवयस्कानां 'तम्म भट्ट' इत्येवं-सर्वे, सर्वरीत्या 'तम्मव', 'मामकः' इति चिरपरिचिताः । २७-२-१९९५, दिनाङ्के स्व सप्तसप्ततिवर्षे सार्थकजीवनं कृत्वा मर्त्यलोकं त्यक्वा स्वर्गस्थाः अभूवन् । परन्तु तैर्दन्तामूल्याग्रन्थाः विचारवाङ्मयानि लेखन सुकीर्तियशोभिः तेषां नाम सदा विराजते । तेषामाशीर्वादं प्रार्थयामि । तेषामहं चिरऋणी ।

ग्रन्थस्यास्य प्रकाशनाय सम्पूर्णधनदानकर्तृणां मित्तूरु पुरोहित शङ्करनारायणभट्टमहोदयानां सुपुत्राणां मित्तूरु (वाल्तजे) तिरुमलेश्वर भट्टानां आयुरारोग्यभाग्यप्राप्तिपूर्वक 'शास्त्रसेवायाः' सम्पूर्णफलं, श्री गङ्गामातुः पूर्णानुग्रहश्च भूयादिति प्रार्थयामि ।

वे । ब्र । श्री मित्तूरु श्रीनिवास भट्टः, एम्. ए.
ज्यौतिषशिरोमणिः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

आशंसनम्

भारतदेशस्य पुण्यनदिषु गङ्गानदी प्रथमतया पूज्यते । सा स्वर्गादवतीर्य भूलोकं पवित्रीकृत्य पाताललोकं प्रतिगच्छति । महाशिवस्य जटादवतीर्य विष्णुपदं प्राप्य स्वयमेव पवित्रीभूत्वा सर्वेषां पापमपनुदति। असारे संसारे सारभूतं चतुष्टयं वर्तते । काश्यां वासः, सतां सङ्गः, गङ्गाम्भः शिवपूजनं चेति ।

गङ्गा गङ्गेति यो ब्रूयात् योजनानां शतैरपि ।
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥

इति गङ्गामाहात्म्यं वर्णितम् । गङ्गास्नानात्, गङ्गापानात् सर्वे पापाः प्रणश्यन्ति गङ्गाजलेन तर्पणात् पितरः तृप्ताः भवन्ति । गङ्गापूजनात्, गङ्गासहस्रनामपठनात् गङ्गास्नानफलं लभ्यत इति स्कान्दपुराणे उक्तम् । एवं च श्राद्धकाले विप्रेषु भुज्यमानेषु गङ्गासहस्रनामजपात् पितरः तृप्ता यान्ति । आस्तिकजनाः पापपरिहारार्थं पुण्यसञ्चयनमुद्दिश्य तीर्थयात्रां कुर्वन्ति । काशीयात्रायाः सम्पूर्णफलप्राप्तये 'काशीसमाराधनम्' इति विशेषकार्यक्रमं स्वगृहे आयोजयन्ति । काशीसमाराधनकाले गङ्गापूजां कृत्वा तेन जलेन शिवमभिषिच्य, सर्वेषां तीर्थं वितरन्ति । किन्तु अस्माकं प्रदेशे गङ्गापूजां कर्तुं प्रत्येकपूजाप्रयोगो न विद्यते । मित्रवरेण श्रीनिवासभट्टमहोदयेन महता परिश्रमेण गङ्गापूजाविधिः सहस्रनामानि च पुस्तकेऽस्मिन् सङ्गृहीतमस्ति । अस्य पुस्तकस्य प्रयोजनं सर्वे प्राप्नुवन्तु इति आशासे ।

वे । ब्र । विद्वान् बोळन्तकोडि रामभट्टः, एम्. ए.
बोळन्तकोडि, ग्रामः कोळ्यूरु, कासरगोडु जिल्ला

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

॥ श्रीः ॥

॥ सम्पादकीयम् ॥

शैलेन्द्रादवतारिणी निजजले मज्जज्जनोत्तारिणी
पारावारविहारिणी भवभयश्रेणीसमुत्सारिणी ।
शेषाङ्गैरनुकारिणी हरशिरोवल्लीदलाकारिणी
काशीप्रान्तविहारिणी विजयते गङ्गामनोहारिणी ॥

श्री गुरुदेवतानां मम पूर्वजानां च महाशीर्वादानुग्रहविशेषादेव महाभाग्यमेतत्प्राप्तम् । स्वर्लोक-मर्त्यलोक-पाताललोक इति त्यैलोक्यपावनी-त्रिपथगा-सकलसुरनमस्कृता, पूर्णब्रह्मस्वरूपिणी, हरिचरण-हरशिरोविभूषिता, संसारकूपात्-उद्धारिणी, निजजले मज्जज्जनानां ब्रह्महत्यादि पापनिवारिणी, पूर्वजानां पापपङ्कादुत्तारिणी भक्तिश्रद्धादरात् ये गङ्गास्नानं कुर्वन्ति तेषां सकल पातकोपपातकादि दूराद्दूरीकृत्य स्वर्ग-मोक्षप्रदा या सुरगङ्गा च । तस्याः कल्पोक्तपूजा ।

'गङ्गा गङ्गेति यो ब्रूयात् प्राणः कण्ठगतैरपि' इत्यादि स्मृत्युक्तरीत्या सा 'गङ्गा' नाम जपमात्रेण सकलपापनिवारिणी किमु स्नानपानयोः?

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

उत्तरभारते कर्णाटके च वैशाखमास–शुक्लपक्ष–सप्तमीतिथौ 'गङ्गोत्पत्तिः' इति दिनविशेषो वर्तते, अवसरेऽस्मिन् 'गङ्गापूजापद्धतिः' (आचरणं) प्रचलिष्यति । अपि च आश्विनमास–कृष्णपक्ष–अष्टमी तिथिः 'गङ्गाष्टमी' इति प्रसिद्धा । दिनेऽस्मिन् वैभवेन स्त्रियः, पुरुषाः बालक–बालिकाश्च गङ्गापूजां आचरन्ति ।

प्रातः काले भक्तिश्रद्धापुरस्सरं नद्यादौ स्नानं कृत्वा तन्नदी–तीर्थं सम्पूज्य 'गङ्गा' इति विभाव्य कलशे तीर्थं प्रपूर्य पूर्णपात्रं (पूर्णकुम्भं) गङ्गातीर्थमयं सम्पाद्य शङ्खभेरीघण्टारवैः गृहमानीय 'गङ्गापूजां' कृत्वा गङ्गातीर्थप्राशन–गङ्गातीर्थस्नानाचरणं च दरीदृश्यन्ते ।

अहं काशीं गमिष्यामि गङ्गास्नानं करोम्यहम् ।
करोमि विश्वनाथस्य दर्शनं मुक्तिहेतवे ॥

इति प्रातःस्मरणं प्रतिदिनं कुर्मः । एवं काशीतीर्थक्षेत्रयात्रायां प्रयागे गङ्गायमुनयोः तथा अन्तर्गामी सरस्वतीनद्याः त्रिवेणीसङ्गमे अस्थिविसर्जनं, सङ्गमस्नानं, तर्पणं–श्राद्धं, काशीक्षेत्रे गङ्गास्नानं, गङ्गापूजा, विश्वनाथदर्शनं, गङ्गाभिषेकः, अर्चनं, गङ्गातीर्थग्रहणं, गयाक्षेत्रे अक्षय्यवटच्छायायां श्रीरुद्रपादादिसमस्तपत्सु, पिण्डदानपूर्वकगयाश्राद्धादि कृत्वा 'गयायां पिण्डदानात् त्रिभिः पुत्रस्य पुत्रता' इति पैतृकऋणविमोचनानन्तरं स्वगृहागमनं कृत्वा 'काशीसमाराधनम्' इति नाम्ना गङ्गाविश्वेश्वरपूजां प्रकुर्वन्ति ।

तत्काले 'श्री गङ्गाकल्पोक्तपूजा' शतरुद्रीयाभिषेकपूर्वक गङ्गाभिषेकविधिः अथवा श्री शिवपूजापुरस्सर गङ्गाभिषेकाचरणं गङ्गातीर्थप्रोक्षणं, गङ्गातीर्थस्नानं, बन्धु–मित्रवर्गेभ्यः गङ्गातीर्थवितरणं, काशीपट्टसूत्र–काशीप्रसादादि गुरु–बन्धु–बान्धवेभ्यः श्रद्धाभक्ति

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

पुरस्सरं दत्वा तेषां अनुग्राशीर्मन्त्राक्षतान् स्वीकृत्य स्वयं प्रसादस्वीकरणं इति सम्प्रदायोस्ति । तस्मात्–तत्सन्दर्भोचित–श्री गङ्गाकल्पोक्तपूजा, अङ्गपूजा, आवरणपूजा, पत्रपूजा–पुष्पपूजा, अकारादिक्षकारान्त–स्वरूपिण्याः गङ्गामातुः अकारादिक्षकारान्ताक्षरमाला इव स्थित श्रीगङ्गासहस्रनामावलिः, अष्टोत्तरशतनामावलिश्च ग्रन्थेऽस्मिन् वर्तन्ते । एवं काश्यादितीर्थक्षेत्रयात्राप्रस्थानविधिः, विप्रपूजनं तथा भवति श्रीकालभैरवाष्टकम्, श्रीगङ्गाष्टकम् श्रीविश्वनाथाष्टकम्, श्रीगङ्गास्तोत्रम्, श्रीकाशीपञ्चकमपि, श्रीचन्द्रशेखराष्टकमपि ।

कल्पोक्तपूजायाः मूलग्रन्थः वैदिकवाङ्मये मेरुतुल्येत्यङ्गीकृतग्रन्थः कन्नडसन्ध्याभाष्यग्रन्थः, सन्ध्यावन्दनम्, पञ्चायतन देवपूजाद्यनेक ग्रन्थलेखनं, सम्पादनं, सङ्ग्रणाम, प्रकाशनं, बोधायनीय पूर्वमध्यमा–परप्रयोगाध्यापनं प्रवचनादि नानाकर्मनिष्णात–बहुजनविख्यात–वाक्चतुर मम कनिष्ठ पितामह मित्तूरु पुरोहित तिम्मय्य भट्टस्य सहोदर मित्तूरु पुरोहित शङ्करनारायणभट्ट महोदयैः संपादितः । परन्तु अप्रकाशितः । मैसूरु सीतारामशास्त्रिभिः परिशोध्य प्रकटित 'सहस्रनामावळिः', 'प्रथमद्वितीय सम्पुटात्मकम्', श्री भगवत्पाद प्रकाशनस्य 'श्रीगङ्गापूजा' श्रीगोकर्णयात्राविधिः धर्मसिन्धुः, मनुस्मृतिः तथा गङ्गापूजा पद्धतिः इत्यादि पुस्तकान् अवलोक्य ग्रन्थोऽयं कृतः । एतेषां सर्वेषां ग्रन्थ कर्तॄणां मया कृतज्ञता समर्प्यते ।

'ब्रह्मश्री मित्तूरु पुरोहित तिम्मय्य भट्ट सम्प्रतिष्ठानस्य विंशोत्सव सम्भ्रमावसरे पुराणप्रवचनमालिकायाः समारोपसमारम्भः तथा एकविंशीय वार्षिकोत्सवस्य सुसन्दर्भे प्रकाशयिष्यमाण सम्प्रतिष्ठानस्य सर्वसदस्यानां, ग्रन्थप्रकाशनसमितिस्थानां शुभाशंसनदत्तानां

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

वे। ब्र। श्री। बोळन्तकोडि रामभट्टः विद्वान् एम्. ए. एतेषां च मम अनेके नमस्काराः

ग्रन्थस्यास्य प्रकाशानाय सम्पूर्ण धनदानकर्तृणां मित्तूरु पुरोहित शङ्करनारायणभट्टमहोदयानां सुपुत्राणां मित्तूरु (वाल्तजे) तिरुमलेश्वर भट्टानां आयुरारोग्यभाग्यप्राप्तिपूर्वक 'शास्त्रसेवायाः' सम्पूर्णफलं, श्री गङ्गामातुः पूर्णानुग्रहश्च भूयादिति सम्प्रार्थयामि ।

अक्षरस्खालित्यनिवारणपूर्वक ग्रन्थसंस्करणार्थं सहकृतानां डा. पादेकल्लु विष्णुभट्ट महोदयानां, अक्षरसंयोजन कर्त्रीणां श्रीमती जयलक्ष्मी एस्. जोयिस् तासामपि कृतज्ञता । प्रत्यक्षतया तथा परोक्षतया सूचनदातृणां महनीयानां नमनम् ।

अस्माकं संप्रतिष्ठानस्य अनेकपूर्वग्रन्थान् यथा भवन्तः प्रोत्साहितवन्तः तथा एतद्ग्रन्थमपि स्वीकृत्य गङ्गामातुः अनुग्रहं प्राप्नुवन्तु भवन्तः इति सविनयप्रार्थना ।

इति

वे। ब्र। मित्तूरु श्रीनिवासभट्टः, एम्. ए.
ज्यौतिषशिरोमणिः
श्रीशरामनिवासः, ग्रामः अनन्ताडि
बण्ट्वालः तालूकः, द. क., कर्णाटकः
सङ्केतितसङ्ख्या – ५७४ २५३

मन्मथनाम सं ।
निज आषाढ १
१७–७–२०१५

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ग्रन्थस्थविषयाणां अनुक्रमः

१.	श्रीगङ्गाकल्पोक्तपूजाविधिः	–	1
२.	काश्यादितीर्थक्षेत्रयात्राप्रस्थानविधिः	–	41
३.	श्रीकालभैरवाष्टकम्	–	45
४.	श्रीगङ्गाष्टकम्	–	47
५.	श्रीविश्वनाथाष्टकम्	–	49
६.	श्रीगङ्गास्तोत्रम्	–	51
७.	श्रीकाशीपञ्चकम्	–	53
८.	श्रीचन्द्रशेखराष्टकम्	–	54

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri



॥ श्रीद्वादशज्योतिर्लिङ्गस्तोत्रम् ॥

सौराष्ट्रे सोमनाथं च श्रीशैले मल्लिकार्जुनम् ।
उज्जयिन्यां महाकालं ओंकारं अमलेश्वरे ॥ १ ॥

परल्यां वैद्यनाथं च डाकिन्यां भीमशङ्करम् ।
सेतुबन्धे तु रामेशं नागेशं दारुकावने ॥ २ ॥

वाराणस्यां तु विश्वेशं त्र्यम्बकं गौतमीतटे ।
हिमालये तु केदारं घुसृणीशं शिवालये ॥ ३ ॥

एतानि ज्योतिर्लिङ्गानि सायं प्रातः पठेन्नरः ।
सप्तजन्मकृतं पापं स्मरणेन विनश्यति ॥ ४ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

श्रीः

॥ श्री गणेशाय नमः ॥

॥ श्रीगङ्गाविश्वेश्वराय नमः ॥

॥ श्रीगङ्गाकल्पोक्तपूजाविधिः ॥

अथ कर्ता सपत्नीकः मङ्गलस्नानादि नित्यकर्म कृत्वा भद्रासने उपविश्य आचम्य (प्राणानायम्य) पवित्रपाणिः । (गुर्वाद्यभिवन्दनं कृत्वा) ॐ ह्रीं परमात्माद्यशेषगुरुपारम्पर्य, क्रमेण स्वगुरुपादाम्बुजं यावत्तावत्प्रणौमि इत्यादि कलशपूजान्तं कृत्वा 'सुमुखश्चैकदन्तश्च' इत्याद्युक्त्वा सङ्कल्पं कुर्यात् - ॐ स्वस्ति । श्रीकृष्ण-कृष्णाद्य... शुभतिथौ । काशी-गया-प्रयागादि तीर्थयात्रायाः प्रतिनिवृत्तस्य... गोत्रोत्पन्नस्य... नक्षत्रे... राशौ जातस्य... (शर्मणो) मम भार्यायाः... अस्माकं सहकुटुंबानां क्षेम-स्थैर्य-धैर्य-वीर्य-विजय-शुभ-अभय-आनंद-आरोग्य-ऐश्वर्याभिवृद्ध्यर्थं धर्म-अर्थ-काम-मोक्षाख्य चतुर्विध फलपुरुषार्थसिद्ध्यर्थं आदित्यादीनां नवानां ग्रहाणां शुभैकादशस्थान-फलावाप्त्यर्थं मम पितृमातृवंशजातानां दिवि भुवि तिर्यङ्नरकादिवासिनां अन्येषां च अस्मत्पूर्वजानां उत्तमलोकावाप्त्यर्यं, समस्त पूर्वजोद्धारार्थं नान्दीमुखाश्रुमुखादि पितृप्रीत्यर्थं ऊष्मपो यमोऽङ्गिरस्वानग्निष्वात्तोग्निः कव्यवाहनादयो ये पितरस्तेषामविच्छिन्नप्रसादसिद्ध्यर्थं असृग्भागि-लेपभागि-पिण्डभागि-विप्रोच्छिष्टभागि-प्रभृतीनामक्षय्यतृप्त्यर्थं नाना पुण्यनदीस्नानपूजाफलसिद्ध्यर्थं मम जन्मप्रभुति अद्य यावत् ज्ञाताज्ञात कामाकाम-सकृदसकृत्कृत-कायिक-वाचिक-मानसिक-स्पृष्टास्पृष्ट-पीतापीत-भुक्ताभुक्त-सकलपातकोपपातक-लघुपातक-सङ्कलीकरण-मलिनीकरणापात्रीकरण-जातिभ्रंशकर-प्रकीर्णकादीनां स्वतः परप्रेरणया वा सम्भभावितानां सकलविधपापानां परिहारार्थं यमुना-सरस्वती-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

चन्द्रभागाख्य–महानदीस्नान–कल्पोक्तफलसिद्ध्यर्थं वेत्रवती–मलापहा–फल्गुनी–कृष्णाख्य–पवित्रनदीक्षेत्रयात्राफलसिद्ध्यर्थं शुतुद्री–गोदावरी–मरुद्वृधाख्य–पुण्यनदीतीर्थमज्जन–शतफलसिद्ध्यर्थं भीमरथी–सीता–चर्मण्वती–नर्मदाख्य–विशिष्ट–नदी–माहात्म्यश्रवणफलावाप्त्यर्थं पयोष्णी–विपाशा–ताम्रपर्णेत्यादि तत्तन्नदी–कल्पोक्त–तत्तत्फलसिद्ध्यर्थं कावेरी–करतोया–नेत्रावत्यादि नदीविशेष–तीर्थविशेष–स्नान–तर्पण–फलावाप्त्यर्थं काश्यां विश्वनाथदर्शनस्य पूर्णफलावाप्त्यर्थं गयायां पिण्डदानस्य साकल्यार्थं प्रयागे त्रिवेणीसङ्गमस्नानस्य समग्रतावाप्त्यर्थं गङ्गाप्रीत्यर्थं गङ्गाकल्पोक्तफलसिद्ध्यर्थं[1] निर्वर्तित यात्रोऽहं अस्मिन् गङ्गातीर्थोदके गङ्गाकल्पोक्तपूजां करिष्ये ॥

तदादौ गणपतिपूजां करिष्ये । इति संकल्प्य, तत्कृत्वा । क्षेत्रपाल वास्तोष्पतिं च सम्पूज्य । सुवर्णपुष्पं दत्वा । ब्राह्मणार्चनं कृत्वा (पञ्चवाक्यैः पुण्याहं वाचयित्वा तत्र श्री गङ्गा (विश्वेश्वरः) प्रीयतां इति विशेषः)

आगमार्थं तु इत्यादि घण्टानादं कृत्वा कलशपूजा, शङ्खपूजा, दीपपूजा, आत्मपूजा, इत्यादि कृत्वा पीठपूजां कृत्वा. [विश्वेश्वरस्य नवशक्तिपूजां कृत्वा (वामायै नमःज्येष्ठायै नमः...) विश्वेश्वरं आवाह्य स्म्पूज्य]

'ॐ महीद्यौः पृथिवी' इत्यादि कलशं संस्थाप्य, वरुणं च आवाह्य संपूज्य 'ॐ आपोहिष्ठा' 'हिरण्यवर्णा' इत्यादि मन्त्रैः प्रोक्ष्य, अथ श्री गङ्गायै नमः नवशक्ति पूजां करिष्ये । ॐ जयायै नमः । ॐ विजयायै

---

१. (बोरवेल्) नूतनतया प्रविधारित जलप्रणाळ्यां (जलस्य) शिवगङ्गात्वसिद्ध्यर्थं अस्मिन् नवोदके गङ्गापूजां करिष्ये ।

(कूपात–गृहीतजलस्य) नवोत्खात कुल्यायाः जलस्य शिवगङ्गात्वसिद्ध्यर्थं अस्मिन् नवोदके गङ्गापूजां करिष्ये ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

नमः । ॐ अजितायै नमः । ॐ अपराजितायै नमः । ॐ नित्यायै नमः । ॐ विलासिन्यै नमः । ॐ दोग्ध्र्यै नमः । ॐ अघोरायै नमः । ॐ मङ्गलायै नमः । नवशक्ति पूजां समर्पयामि ॥

ॐ नमो भगवत्यै सर्वभूतात्मिकायै सकलगुणशक्तियुक्तायै त्रिपथगामिन्यै योगपद्मपीठात्मिकायै गङ्गायै नमः, सुवर्णपीठं कल्पयामि ।

स्वात्मसंस्थामजां शुद्धां त्वामद्य परमेश्वरि ।

अरण्यामिव हव्याशं (मूर्त्यां) अप्सु आवाहयाम्यहम् ॥

आवाहयेत्, ॐ भूः गङ्गां (गङ्गाविश्वेश्वरं) आवाहयामि । ॐ भुवः गङ्गां (गङ्गा विश्वेश्वरं)... ॐ भूर्भुवस्सुवरों सशक्ति-साङ्ग-सायुध-सवाहन-सर्वालङ्कार-भूषितां श्रीगङ्गां (श्रीगङ्गाविश्वेश्वरं) आवाहयामि । आवाहिता भव ॥ संस्थापिता भव ।... सान्निध्यं कुरु ।

ॐ व्योमगामिन्यै विद्महे नारायण्यै च धीमहि ।

तन्नो गङ्गा प्रचोदयात् ॥ इदमर्घ्यमिदमर्घ्यम् ॥

अस्य श्री गङ्गा मूलमन्त्रस्य नारद ऋषिः । गायत्रीच्छन्दः । श्री गङ्गा देवता । ह्रां इत्यादि करषडङ्गन्यासः । एवं हृदयादिन्यासः । ध्यानम् ।

सितमकरनिषण्णां शुभ्रवर्णां त्रिणेत्राम्
करधृतकलशोद्यत्सोत्पलाभीत्यभीष्टाम् ।
बिधिहरिहररूपां सेन्दुकोटीरचूडाम्
भसितसितदुकूलां जाह्नवीं तां नमामि ॥

॥ मूलमन्त्रः ॥

ॐ ह्रीं शिवजटाधिरूढायै त्रिपथगामिन्यै गङ्गायै नमः ॥ इति त्रिवारं जप्त्वा ॐ आं ह्रीं क्रों यं रं लं... श्री गङ्गायाः प्राणा

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

इहप्राणाः । ॐ आं ह्रीं... श्री गङ्गायाः जीव इहस्थितः । ॐ आं ह्रीं क्रों... श्री गङ्गायाः सर्वेन्द्रियाणि... तिष्ठन्तु स्वाहा ।

ॐ असुनीते... स्वस्ति । ततः पञ्चदशप्रणवावृत्तीः कृत्वा ।

ॐ लं पृथिव्यात्मिकायै गन्धं... इत्यादि पञ्चोपचारान् कृत्वा ।

द्वादशनामपूजां करिष्ये ।

ॐ गङ्गायै नमः । ॐ जह्नुकन्यायै नमः ।

ॐ भीष्मजनन्यै नमः । ॐ आदिपितामहकमण्डलुकणिकायै नमः ।

ॐ काशीप्रन्तविहारिण्यै नमः ।

ॐ शुभ्रवर्णायै नमः । ॐ शिवायै नमः ।

ॐ भगीरथानुगायै नमः । (ॐ भागीरथ्यै नमः ।)

ॐ तरलतरतरङ्गायै नमः । ॐ पितृप्रियायै नमः ।

ॐ मन्दाकिन्यै नमः । ॐ विजयान्निम्नगायै नमः ।

श्री गङ्गायै नमः । द्वादशनामपूजां समर्पयामि ॥

श्री गङ्गायै नमः । ध्यायामि ध्यानं समर्पयामि इत्यादि.

षोडशोपचारान् कृत्वा ।

अथ कल्पोक्तषोडशोपचारपूजां करिष्ये ।

॥ ध्यायेत् ॥

ब्रह्माण्डं खण्डयन्तीं हरशिरसि जटावल्लिमुल्लासयन्तीम् ।
स्वर्लोकादापतन्तीं कनकगिरिगुहागण्डशैलात् स्खलन्तीम् ।
क्षोणीपृष्ठे लुठन्तीं दुरितचयचमूनिर्भरं भर्त्सयन्तीम्
पाथोधिं पूरयन्तीं सुरनगरसरित्पावनीं भावयामि ॥
आदावादि पितामहस्य निगमव्यापारपात्रे जलम्
पश्चात्पन्नगशायिनो भगवतः पादोदकं पावनम् ।
भूयःशम्भुजटाविभूषणमणिः जह्नोर्महर्षेरियम्
कन्या कल्मषनाशिनी भगवती भागीरथी पातु माम् ॥

श्रीगङ्गायै नमः ध्यानं समर्पयामि ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

॥ अथावाहनम् ॥

क्वचिन्मुनिगणस्तुते क्वचिदनन्तसम्पूजिते
क्वचित्कलकलस्वने क्वचिदधीरयोधोगणे ।
क्वचिद्रविकरोज्ज्वले क्वचिदुदग्रपाताकुले
भगीरथनृपस्तुते शिवकरं तवावाहनम् ॥
विष्णुपादाब्जसम्भूते विश्वनाथशिरस्थिते ॥
आवाहयामि गङ्गे त्वां भक्ताभीष्टफलप्रदे ॥
ॐ हिरण्यवर्णां... आवह ॥

श्रीगङ्गायै नमः आवाहनं समर्पयामि ॥

(ॐ नमस्ते रुद्र... ते नमः ॥
श्री गङ्गाविश्वेश्वराय नमः आवाहनं समर्पयामि)

॥ अथासनम् ॥

गङ्गावारि मनोहारि मुरारि चरणच्युतम् ।
त्रिपुरारि तिरश्चारि पापहारि पुनातु माम् ॥
मुक्तारत्नसुवर्णादिखचितं सुन्दरं शुभम् ।
सिंहासनं प्रदास्यामि गृहाण मकरासने ॥
ॐ तां म आवह... पुरुषानहम् ॥

श्रीगङ्गायै नमः आसनं समर्पयामि ।

(ॐ यात इषुः... मृडय ॥ श्रीगङ्गाविश्वेश्वराय नमः आसनं समर्पयामि)

॥ अथ पाद्यम् ॥

चरद्विहगसङ्कुले सगरवंशमुक्तिप्रदे ।
मुनीन्द्रवरसंस्तुते दिवि च माल्यसंशोभिते ॥
सदादुरितनाशिके विरचितं त्वदर्थे मया

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

गृहाण जगदम्बिके सुविमलेऽत्र पाद्यं मुदा ॥
सिन्ध्वादि सरिदुद्भूतं गंधपुष्पसमन्वितम् ।
पाद्यं ददाम्यहं देवि प्रसीद परमेश्वरि ॥
ॐ अश्वपूर्वां... जुषताम् ॥
श्रीगङ्गायै नमः पाद्यं समर्पयामि ॥
(ॐ याते रुद्र... अभिचाकशीहि ॥ श्रीगङ्गा... पाद्यं)

॥ अथार्घ्यम् ।

पद्मासनस्थे देवेशि काश्यामुत्तरवाहिनि ।
गृहाणार्घ्यं मया दत्तं जाह्नव्यै ते नमो नमः ॥
ॐ कांसोस्मितां... श्रियम् ॥
श्रीगङ्गायै नमः अर्घ्यं समर्पयामि ॥
(ॐ यामिषुं... जगत् ॥ श्रीगङ्गाविश्वे... अर्घ्यं... ॥)

॥ अथाचमनीयम् ॥

नमः शिवायै गङ्गायै शिवदायै नमो नमः ।
नमस्ते रुद्ररूपिण्यै गृहाणाचमनीयकम् ॥
सुवर्णकलशानीतं नानागन्धसुवासितम् ।
आचम्यतां मया दत्तं गृहाणामृतवर्षिणि ॥
ॐ चन्द्रां प्रभासां... त्वां वृणे ॥
श्रीगङ्गायै नमः आचमनीयं समर्पयामि ॥
(ॐ शिवेन वचसा... असत् ॥ श्रीगङ्गाविश्वे... आचमनीयं...)

॥ अथ मधुपर्कम् ॥

दधिक्षीरघृतैर्युक्तं स्वादूदकसमन्वितम् ।
मधुपर्कं मया दत्तं गृहाण परमेश्वरि ॥
श्रीगङ्गायै नमः मधुपर्कं समर्पयामि ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

(ॐ अध्यवोच... यातु धान्यः ॥ श्रीगङ्गा विश्वे... मधुपर्कं)
(ॐ आपो हि ष्ठा... चनः । मलापकर्षणस्नानं समर्पयामि)
(अथ आप्यायस्व इत्यादिभिः पञ्चामृताभिषेकं प्रोक्षणं वा कुर्यात्)
क्षीरं दधि घृतं चैव मधुशर्करयान्वितम् ।
पञ्चामृतं गृहाणेदं प्रसीद परमेश्वरि ॥

॥ अथ स्नानम् (महाभिषेकं वा) ॥

सकलकलुषभङ्गे स्वर्गसोपानसङ्गे ।
तरलतरतरङ्गे देवि गङ्गे प्रसीद ॥
विनिहितमिदमत्र स्नानवारि प्रसन्नम् ।
विधिहरिहररूपे स्नाहि सौख्यं महेशि ॥
नर्मदायमुनासिन्धुगोदावर्याहृतैर्जलैः ।
स्नापयामि शिवे भक्त्या भागीरथि नमोऽस्तु ते ॥
ॐ आदित्यवर्णे... अलक्ष्मीः ॥

महाभिषेकस्नानं (श्रीरुद्र–चमक–श्रीसूक्त–दुर्गासूक्त–पुरुषसूक्तादि मन्त्रैः यथासम्भवं स्नपयेत् प्रोक्षयेद्वा ।)

श्रीगङ्गायै नमः स्नानं समर्पयामि ॥

(ॐ असौ यस्ताम्रो... ईमहे ॥ श्रीगङ्गाविश्वे... स्नानं...)
स्नानानन्तरं पुनराचमनं समर्पयामि ॥

॥ अथ वस्त्रम् (वस्त्रयुग्मम्) ॥

सितमकरनिषण्णे भीष्ममातासि नूनम् ।
चकितमिवगभीरं देविरूपं सुधीरम् ॥
तवपरमहिमानं देवि वाचाममानम् ।
भसितसितदुकूले (सुजाती) जाह्नवि त्वं गृहाण ॥
वैडूर्यपद्मरागादिखचितं मेखलान्वितम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सुवर्णसूत्रसंयुक्तं वस्त्रं दास्यामि गृह्यताम् ॥
ॐ उपैतु मां... ददातु मे ॥
श्रीगङ्गायै नमः वस्त्रं (युग्मं) समर्पयामि ॥
(ॐ असौ योऽवसर्पति... मृडयाति नः ॥ श्रीगङ्गाविश्वेश्व... वस्त्रयुग्मं समर्पयामि)

॥ अथोपवीतम् ॥

ब्रह्मविष्णुमहेश्वरपाणिप्रोततन्तुरचितं शुभरूपम् ।
यज्ञसूत्रमिदमत्र तवार्थे कल्पितं करुणयाऽनुगृहाण ॥
ब्रह्मसूत्रमिदं देवि त्रिगुणीकृतमुज्ज्वलम् ।
उपवीतं गृहाण त्वं विधिशक्रादिपूजिते ॥
श्रीगङ्गायै नमः उपवीतं समर्पयामि ॥
(ॐ नमो अस्तु नील... अकरं नमः ॥ श्रीगङ्गाविश्वे... उपवीतं)

॥ अथाभरणम् ॥

नमो जह्नुकन्ये न मन्ये त्वदन्याम्
वसिष्ठादिभिर्गीयमानाभिधेयम् ।
चलन्नूपुरं चाङ्गदद्वन्द्वमेतत्
त्वदर्थे प्रदत्तं गृहाणाभिरामम् ॥
माणिक्यमुक्ताफलविद्रुमैश्च ।
गोमेदवैडूर्यकपुष्यरागैः ।
प्रवालनीलैश्च कृतं गृहाण
दिव्यं हि रत्नाभरणं च देवि ॥
ॐ क्षुत्पिपासामलां... मे गृहात् ॥
श्रीगङ्गायै नमः आभरणं समर्पयामि ॥
(ॐ नमः शिवाय । श्रीगङ्गाविश्वे... आभरणं...)

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

॥ अथ गन्धम् ॥

मलयाचलसम्भूतं श्रीगन्धं चन्द्रमिश्रितम् ।
सुगन्धोज्ज्वलकस्तूरीकुङ्कुमाङ्कितमर्पये ॥
मलयाचलसम्भूतं कस्तूरीकुङ्कुमान्वितम् ।
कर्पूरगन्धसम्मिश्रं गृहाण परमेश्वरि ॥
ॐ गन्धद्वारां... ह्वये श्रियम् ॥

श्रीगङ्गायै नमः । गन्धं समर्पयामि ॥

(ॐ प्रमुञ्च... वप ॥ श्रीगङ्गाविश्वे... गन्धं...)
श्री कुङ्कुमदिग्धाङ्ग्यै नमः कुङ्कुमं समर्पयामि ।
श्री कस्तूरीतिलकाञ्चितायै नमः कस्तूरिकां समर्पयामि ।
नानापरिमलद्रव्यं समर्पयामि ।
श्री सौभाग्यदायिन्यै नमः सौभाग्यद्रव्यं समर्पयामि ।
रोचनं समर्पयामि ।
श्री हरिद्रारञ्जितायै नमः हरिद्रां समर्पयामि ।
श्री सीमन्तभूषणायै नमः सिन्दूरं समर्पयामि ।
घनसारं समर्पयामि । कृष्णागरुं समर्पयामि ।
कक्कोलं समर्पयामि । पट्टसूत्रं समर्पयामि ।
चूडामणिं समर्पयामि । नासाभरणं समर्पयामि ।
कङ्कतिकां समर्पयामि । काञ्चीं समर्पयामि ।
मञ्जीरं समर्पयामि । ताटङ्कं समर्पयामि ।
कटकं समर्पयामि । यक्षकर्दमं समर्पयामि ।
अङ्गरागं समर्पयामि । नानाभूषणानि समर्पयामि ।

श्रीगङ्गायै नमः मङ्गलद्रव्याणि समर्पयामि ।

अक्षतान् शालिसम्भूतान् हरिद्राकुङ्कुमान्वितान् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

गृहाण जह्नुतनये अक्षय्यफलदायिनि ॥
ॐ मनसः कामं... श्रयतां यशः ॥
श्रीगङ्गायै नमः अक्षतान् समर्पयामि ॥
(ॐ नमः शिवाय । श्रीगङ्गाविश्वे... अक्षतान्...)

॥ अथ पुष्पम् ॥

कल्हारोत्पल - चाम्पेय - जाती - मन्दारकेतकैः ।
अर्हणां ते करिष्यामि पुनीहि मम पातकम् ॥
श्रीगङ्गायै नमः अर्हणापुष्पं समर्पयामि ।
केतकीतुलसीबिल्वमल्लिकाकमलादिभिः ।
पुन्नागैरर्चयामि त्वां गृहाणामरवन्दिते ॥
ॐ कर्दमेन... मालिनीम् ॥
श्रीगङ्गायै नमः पुष्पाणि समर्पयामि ।

॥ अथ अङ्गपूजां करिष्ये ॥

ॐ पापपर्वतनाशिन्यै नमः । पादयोः पूजयामि ।
ॐ भक्तवत्सलायै नमः । गुल्फौ पूजयामि ।
ॐ जगद्धात्र्यै नमः । जङ्घे पूजयामि ।
ॐ जाह्नव्यै नमः । जानुनी पूजयामि ।
ॐ शैलसुतायै नमः । ऊरू पूजयामि ।
ॐ समुद्रगामिन्यै नमः । कटिं पूजयामि ।
ॐ मकरारूढायै नमः । गुह्यं पूजयामि ।
ॐ आनन्दवर्धिन्यै नमः । जघनं पूजयामि ।
ॐ गङ्गायै नमः । नाभिं पूजयामि ।
ॐ जगत्कुक्ष्यै नमः । उदरं पूजयामि ।
ॐ विशालवक्षायै नमः । वक्षस्थलं पूजयामि ।
ॐ ह्लादिन्यै नमः । हृदयं पूजयामि ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ सुस्तन्यै नमः । स्तनौ पूजयामि ।
ॐ तरङ्गिण्यै नमः । पार्श्वे पूजयामि ।
ॐ उन्नतकण्ठ्यै नमः । कण्ठं पूजयामि ।
ॐ त्रैलोक्यसुन्दर्यै नमः । स्कन्धौ पूजयामि ।
ॐ अमृतकलशहस्तायै नमः । हस्तान् पूजयामि ।
ॐ लीलाशुकधारिण्यै नमः । बाहून् पूजयामि ।
ॐ विद्याप्रकाशिन्यै नमः । मुखं पूजयामि ।
ॐ त्र्यैलोक्यगामिन्यै नमः । ललाटं पूजयामि ।
ॐ सुनासिकायै नमः । नासिकां पूजयामि ।
ॐ मकरकुण्डलधारिण्यै नमः । श्रोत्रे पूजयामि ।
ॐ बिम्बोष्ठ्यै नमः । ओष्ठौ पूजयामि ।
ॐ अनाथरक्षिण्यै नमः । अधरं पूजयामि ।
ॐ चञ्चलगत्यै नमः । जिह्वां पूजयामि ।
ॐ अलकनन्दायै नमः । गण्डस्थलं पूजयामि ।
ॐ तिलकधारिण्यै नमः । फालं पूजयामि ।
ॐ ज्ञानरूपिण्यै नमः । चुबुकं पूजयामि ।
ॐ अमृतबिम्बायै नमः । अलकान् पूजयामि ।
ॐ भीमरथ्यै नमः । शिरः पूजयामि ।
ॐ भागीरथ्यै नमः । सर्वाण्यङ्गानि पूजयामि ।

अङ्गपूजां समर्पयामि ॥

॥ अथ आवरणपूजां करिष्ये ॥

अथ प्रथमावरणपूजां करिष्ये

ॐ ह्रां हृदयाङ्गदेवताभ्यो नमः ॥
ॐ ह्रीं शिरोङ्गदेवताभ्यो नमः ॥
ॐ ह्रूं शिखाङ्गदेवताभ्यो नमः ॥
ॐ ह्रैं कवचाङ्गदेवताभ्यो नमः ॥
ॐ ह्रौं नेत्राङ्गदेवताभ्यो नमः ॥
ॐ ह्रः अस्त्राङ्गदेवताभ्यो नमः ॥

इति प्रथमावरणम् ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अथ द्वितीयावरणपूजां करिष्ये

ॐ कश्यपाय नमः ॥

ॐ अत्रये नमः ॥

ॐ भरद्वाजाय नमः ॥

ॐ विश्वामित्राय नमः ॥

ॐ गौतमाय नमः ॥

ॐ जमदग्नये नमः ॥

ॐ वसिष्ठाय नमः ॥

ॐ अरुन्धत्यै नमः ॥

इति द्वितीयावरणम् ॥

अथ तृतीयावरणपूजां करिष्ये

ॐ ब्राह्मै नमः ॥

ॐ माहेश्वर्यै नमः ॥

ॐ कौमार्यै नमः ॥

ॐ वैष्णव्यै नमः ॥

ॐ वाराह्यै नमः ॥

ॐ नारसिंह्यै नमः ॥

ॐ इन्द्राण्यै नमः ॥

ॐ चामुण्डायै नमः ॥

इति तृतीयावरणम् ॥

अथ चतुर्थावरणपूजां करिष्ये

ॐ इन्द्राय नमः ॥

ॐ अग्नये नमः ॥

ॐ यमाय नमः ॥

ॐ निर्ऋतये नमः ॥

ॐ वरुणाय नमः ॥

ॐ वायवे नमः ॥

ॐ सोमाय नमः ॥

ॐ ईशानाय नमः ॥

इति चतुर्थावरणम् ॥

अथ पञ्चमावरणपूजां करिष्ये

ॐ वज्राय नमः ॥

ॐ शक्तये नमः ॥

ॐ दण्डाय नमः ॥

ॐ खड्गाय नमः ॥

ॐ पाशाय नमः ॥

ॐ अङ्कुशाय नमः ॥

ॐ गदायै नमः ॥

ॐ त्रिशूलाय नमः ॥

इति पञ्चमावरणम् ॥

आवरणदेवताभ्यो नमः स्वस्ति जलगन्धाद्युपचारान् समर्पयामि ।
आवरणपूजां समर्पयामि ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

॥ अथ पत्रपूजां करिष्ये ॥

ॐ गङ्गायै नमः पारिजातपत्रं समर्पयामि ॥

ॐ कमलवासिन्यै नमः मल्लिकापत्रं समर्पयामि ॥

ॐ सर्वज्ञायै नमः पुन्नागपत्रं समर्पयामि ॥

ॐ वरदायै नमः अशोकपत्रं समर्पयामि ॥

ॐ भवनाशिन्यै नमः मरुगपत्रं समर्पयामि ॥

ॐ अभीष्टदायै नमः दूर्वापत्रं समर्पयामि ॥

ॐ सर्वमङ्गलायै नमः सर्वाणि पत्राणि समर्पयामि ॥

॥ अथ पुष्पपूजां करिष्ये ॥

ॐ त्रिपथगामिन्यै नमः शतपत्रपुष्पं समर्पयामि ॥

ॐ भीमरथ्यै नमः पुन्नागपुष्पं समर्पयामि ॥

ॐ नर्मदायै नमः अशोकपुष्पं समर्पयामि ॥

ॐ सरस्वत्यै नमः मल्लिकापुष्पं समर्पयामि ॥

ॐ गोदावर्यै नमः सेवन्तिकापुष्पं समर्पयामि ॥

ॐ काळिन्द्यै नमः चम्पकपुष्पं समर्पयामि ॥

ॐ विश्वमात्रे नमः सर्वाणि पुष्पाणि समर्पयामि ॥

॥ अथ सहस्रनामपूजां करिष्ये ॥

अस्य श्रीगङ्गासहस्रनामस्तोत्रमन्त्रस्य, स्कन्द ऋषिः, अनुष्टुप् छन्दः, श्रीगङ्गाभागीरथी देवता, मम इष्टार्थसिद्ध्यये पुष्पार्चने विनियोगः ॥

॥ ॐ ह्रां, ह्रीं इत्यादि षडङ्गन्यासं कुर्यात् ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अथ द्वितीयावरणपूजां करिष्ये

ॐ कश्यपाय नमः ॥
ॐ अत्रये नमः ॥
ॐ भरद्वाजाय नमः ॥
ॐ विश्वामित्राय नमः ॥
ॐ गौतमाय नमः ॥
ॐ जमदग्नये नमः ॥
ॐ वसिष्ठाय नमः ॥
ॐ अरुन्धत्यै नमः ॥
इति द्वितीयावरणम् ॥

अथ तृतीयावरणपूजां करिष्ये

ॐ ब्राह्मै नमः ॥
ॐ माहेश्वर्यै नमः ॥
ॐ कौमार्यै नमः ॥
ॐ वैष्णव्यै नमः ॥
ॐ वाराह्यै नमः ॥
ॐ नारसिंह्यै नमः ॥
ॐ इन्द्राण्यै नमः ॥
ॐ चामुण्डायै नमः ॥
इति तृतीयावरणम् ॥

अथ चतुर्थावरणपूजां करिष्ये

ॐ इन्द्राय नमः ॥
ॐ अग्नये नमः ॥
ॐ यमाय नमः ॥
ॐ निर्ऋतये नमः ॥
ॐ वरुणाय नमः ॥
ॐ वायवे नमः ॥
ॐ सोमाय नमः ॥
ॐ ईशानाय नमः ॥
इति चतुर्थावरणम् ॥

अथ पञ्चमावरणपूजां करिष्ये

ॐ वज्राय नमः ॥
ॐ शक्तये नमः ॥
ॐ दण्डाय नमः ॥
ॐ खड्गाय नमः ॥
ॐ पाशाय नमः ॥
ॐ अङ्कुशाय नमः ॥
ॐ गदायै नमः ॥
ॐ त्रिशूलाय नमः ॥
इति पञ्चमावरणम् ॥

आवरणदेवताभ्यो नमः स्वस्ति जलगन्धाद्युपचारान् समर्पयामि ।
आवरणपूजां समर्पयामि ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

॥ अथ पत्रपूजां करिष्ये ॥

ॐ गङ्गायै नमः पारिजातपत्रं समर्पयामि ॥

ॐ कमलवासिन्यै नमः मल्लिकापत्रं समर्पयामि ॥

ॐ सर्वज्ञायै नमः पुन्नागपत्रं समर्पयामि ॥

ॐ वरदायै नमः अशोकपत्रं समर्पयामि ॥

ॐ भवनाशिन्यै नमः मरुगपत्रं समर्पयामि ॥

ॐ अभीष्टदायै नमः दूर्वापत्रं समर्पयामि ॥

ॐ सर्वमङ्गलायै नमः सर्वाणि पत्राणि समर्पयामि ॥

॥ अथ पुष्पपूजां करिष्ये ॥

ॐ त्रिपथगामिन्यै नमः शतपत्रपुष्पं समर्पयामि ॥

ॐ भीमरथ्यै नमः पुन्नागपुष्पं समर्पयामि ॥

ॐ नर्मदायै नमः अशोकपुष्पं समर्पयामि ॥

ॐ सरस्वत्यै नमः मल्लिकापुष्पं समर्पयामि ॥

ॐ गोदावर्यै नमः सेवन्तिकापुष्पं समर्पयामि ॥

ॐ काळिन्द्यै नमः चम्पकपुष्पं समर्पयामि ॥

ॐ विश्वमात्रे नमः सर्वाणि पुष्पाणि समर्पयामि ॥

॥ अथ सहस्रनामपूजां करिष्ये ॥

अस्य श्रीगङ्गासहस्रनामस्तोत्रमन्त्रस्य, स्कन्द ऋषिः, अनुष्टुप् छन्दः, श्रीगङ्गाभागीरथी देवता, मम इष्टार्थसिद्ध्यर्थे पुष्पार्चने विनियोगः ॥

॥ ॐ ह्रां, ह्रीं इत्यादि षडङ्गन्यासं कुर्यात् ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

॥ अथ ध्यानम् ॥

चतुर्भुजां त्रिणेत्रां च नदीनदनिषेविताम् ।
लावण्यामृतनिष्यन्दसंशीलद्गात्रयष्टिकाम् ॥
पूर्णकुम्भस्थिताम्भोजवरदाभयसत्कराम् ।
चामरैर्वीज्यमानां तां श्वेतच्छत्रोपशोभिताम् ॥
सुधाप्लावितभूपृष्ठां दिव्यगन्धानुलेपनाम् ।
त्रैलोक्यपूजितां वन्दे देवर्षिभिरभिष्टुताम् ॥ इति ध्यानम् ॥
(श्रीगङ्गादेवीप्रीत्यर्थे- सहस्रनामभिः पुष्पार्चने विनियोगः ॥)
(॥ स्कन्द उवाच ॥) **॥ ॐ नमो गङ्गादेव्यै ॥**

ॐ ओङ्काररूपिण्यै नमः
[1]अजरायै नमः
अतुलायै नमः
अनन्तायै नमः
अमृतस्रवायै नमः
अत्युदारायै नमः
अभयायै नमः
अशोकायै नमः
अलकनन्दायै नमः
अमृतायै नमः १०
अमलायै नमः
अनाथवत्सलायै नमः
अमोघायै नमः
अपांयोनये नमः
अमृतप्रदायै नमः
ॐ अव्यक्तलक्षणायै नमः
अक्षोभ्यायै नमः
अनवच्छिन्नायै नमः
अपरायै नमः
अजितायै नमः २०
अनाथनाथायै नमः
अभीष्टार्थसिद्धिदायै नमः
अनङ्गवर्धिन्यै नमः
अणिमादिगुणायै नमः
अग्रगण्यायै नमः
अलीकहारिण्यै नमः
अचिन्त्यशक्तये नमः (शक्तै)
अनघायै नमः
अद्भुतरूपायै नमः
अघहारिण्यै नमः ३०

१. सहस्रनामार्चनेषु सर्वत्र आदौ 'ॐ' इति योजयित्वा पठ्यते ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ अद्रिराजसुतायै नमः
अष्टाङ्गयोगसिद्धिप्रदायै नमः
अच्युतायै नमः
अक्षुण्णशक्तये नमः (शक्तै)
असुदायै नमः
अनन्ततीर्थायै नमः
अमृतोदकायै नमः
अनन्तमहिमायै नमः
अपारायै नमः
अनन्तसौख्यप्रदायै नमः ४०
अन्नदायै नमः
अशेषदेवतामूर्त्यै(मूर्तये) नमः
अघोरायै नमः
अमृतरूपिण्यै नमः
अविद्याजालशमन्यै नमः
अप्रतर्क्यगतिप्रदायै नमः
अशेषविघ्नसंहर्त्र्यै नमः
अशेषगुणगुम्फितायै नमः
अज्ञानतिमिरज्योतिषे नमः
अनुग्रहपरायणायै नमः ५०
अभिरामायै नमः
अनवद्याङ्ग्यै नमः
अनन्तसारायै नमः
अकलङ्किन्यै नमः
[१]अधारायै नमः

ॐ आरोग्यदायै नमः
आनन्दवत्यै नमः
आपन्नार्तिविनाशिन्यै नमः
आश्चर्यमूर्त्यै नमः (रूपिण्यै)
आयुष्यायै नमः ६०
आढ्यायै नमः
आद्यायै नमः
[२]आप्रायै नमः (आप्तायै)
आर्यसेवितायै नमः
आप्यायिन्यै नमः
आप्तविद्यायै नमः
आख्यायै नमः
आनन्दायै नमः
आश्वासदायिन्यै नमः
आलस्यघ्नायै नमः ७०
आपदां हन्त्रै नमः
आनन्दामृतवर्षिण्यै नमः
इरावत्यै नमः
इष्टदात्र्यै नमः
इष्टायै नमः
इष्टापूर्तफलदायै नमः
इतिहासश्रुतीड्यार्थायै नमः
इहामुत्रशुभप्रदायै नमः
इज्याशीलसमज्ज्येष्ठायै नमः
इन्द्रादिपरिवन्दितायै नमः ८०

१. अधारा – अः विष्णुः धार आधारो यस्याः सा
२. आप्रा – आसमन्तत् प्राति पूरयतीत्याप्रा–प्रा – पूरण इति धातुः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ इलालङ्कारमालायै नमः
इड्वायै नमः
इन्दिरारम्यमन्दिरायै नमः
³इते नमः
इन्दिरादिसंसेव्यायै नमः
ईश्वर्यै नमः
ईश्वरवल्लभायै नमः
ईतिभीतिहरायै नमः
ईड्यायै नमः
ईडनीयचरित्रभृते नमः ९०
उत्कृष्टशक्त्यै(शक्तये) नमः
उत्कृष्टायै नमः
उडुपमण्डलचारिण्यै नमः
उदिताम्बरमार्गायै नमः
⁴उस्रायै नमः
उरगलोकविहारिण्यै नमः
⁵उक्षायै नमः
उर्वरायै नमः
उत्पलायै नमः
उत्कुम्भायै नमः १००
उपेन्द्रचरणद्रवायै नमः
उदन्वत्पूर्तिहेतवे नमः
उदारायै नमः
उत्साहप्रवर्धिन्यै नमः
उद्वेगघ्न्यै नमः

ॐ उष्णशमन्यै नमः
उष्णरश्मिसुताप्रियायै नमः
उत्पत्तिस्थितिसंहारकारिण्यै नमः
उपरिचारिण्यै नमः
ऊर्जंवहन्त्यै नमः ११०
ऊर्जधरायै नमः
ऊर्जावत्यै नमः
ऊर्मिमालिन्यै नमः
ऊर्ध्वरेतः प्रियायै नमः
ऊर्ध्वाध्वने नमः
ऊर्मिलायै नमः
ऊर्ध्वगतिप्रदायै नमः
ऋषिवृन्दस्तुतायै नमः
ऋद्धये नमः
ऋणत्रयविनाशिन्यै नमः १२०
ऋतम्भरायै नमः
ऋद्धिदात्र्यै नमः
ऋक्स्वरूपायै नमः
ऋजुप्रियायै नमः
ऋक्षमार्गवहायै नमः
ऋक्षार्चिषे नमः
ऋजुमार्गप्रदर्शिन्यै नमः
एधिताखिलधर्मार्थायै नमः
एकस्यै नमः
एकामृतदायिन्यै नमः १३०

३. इते–सर्वेगत्यर्था ज्ञानार्था इति न्यायेन इत्–ज्ञानस्य रूपेत्यर्थः
४. उस्रा–द्योतनात्मिकेति यावत् ५. उक्षा–उक्षति फलसेकं करोत्युक्षा

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ एधनीयस्वभावायै नमः
एज्यायै नमः
[६]एजिताशेषपातकायै नमः
ऐश्वर्यदायै नमः
ऐश्वर्यरूपायै नमः
ऐतिह्यायै नमः
ऐन्दव्यैद्युतये नमः
ओजस्विन्यै नमः
ओषधिक्षेत्रायै नमः
ओजोदायै नमः १४०
ओदनदायिन्यै नमः
ओष्ठामृतायै नमः
औन्नत्यदात्र्यै नमः
(भवरोगिणां) औषधायै नमः
औदार्यचंचवे नमः
औषन्द्यै नमः
औग्र्यै नमः
औमेयरूपिण्यै नमः
अम्बराध्ववहायै नमः
अम्बष्ठायै नमः १५०
अम्बरमालायै नमः
अम्बुजेक्षणायै नमः
अम्बिकायै नमः
अम्बुमहायोन्यै नमः
अन्धोदायै नमः

ॐ अन्धकहारिण्यै नमः
अंशुमालायै नमः
अंशुमत्यै नमः
अङ्गीकृतषडाननायै नमः
अन्धतामिस्रहन्त्यै नमः १६०
[७]अन्धवे नमः
अञ्जनायै नमः
अञ्जनावत्यै नमः
कल्याणकारिण्यै नमः
काम्यायै नमः
कमलोत्पलगन्धिन्यै नमः
कुमुद्वत्यै नमः
कमलिन्यै नमः
कान्त्यै नमः
कल्पितदायिन्यै नमः १७०
काञ्चनाक्ष्यै नमः
कामधेनवे नमः
कीर्तिकृते नमः
क्लेशनाशिन्यै नमः
क्रतुश्रेष्ठायै नमः
क्रतुफलायै नमः
कर्मबन्धविभेदिन्यै नमः
कमलाक्ष्यै नमः
क्लमहरायै नमः
कृशानुतपनद्युत्यै नमः १८०

६. एजिताशेषपातका–एजितानि कम्पितान्यशेषाणि पातकानि यया सा एज्य–कम्पन–इतिधातुः

७. अन्धुः – धर्मकूपस्वरूपा

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ करुणार्द्रायै नमः
कल्याण्यै नमः
कलिकल्मषनाशिन्यै नमः
कामरूपायै नमः
क्रियाशक्त्यै नमः
कमलोत्पलमालिन्यै नमः
कूटस्थायै नमः
करुणायै नमः
कान्तायै नमः
कूर्मयानायै नमः १९०

कलावत्यै नमः
कमलायै नमः
कल्पलतिकायै नमः
काल्यै नमः
कलुषवैरिण्यै नमः
कमनीयजलायै नमः
कम्रायै नमः
कपर्दिसुकपर्दगायै नमः
कालकूटप्रशमन्यै नमः
कदम्बकुसुमप्रियायै नमः २००

कालिन्द्यै नमः
केलि ललितायै नमः
कलकल्लोलमालिकायै नमः
क्रान्तलोकत्रयायै नमः
कण्ड्वै नमः
कण्डूतनयवत्सलायै नमः

ॐ खड्गिन्यै नमः
खड्गधाराभायै नमः
खगायै नमः
खण्डेन्दुधारिण्यै नमः २१०

खेखेलगामिन्यै नमः
खस्थायै नमः
खण्डेन्दुतिलकप्रियायै नमः
खेचर्यै नमः
खेचरीवन्द्यायै नमः
ख्यात्यै नमः
ख्यातिप्रदायै नमः
खण्डितप्रणताघौघायै नमः
खलबुद्धिविनाशिन्यै नमः
खातैनःकन्दसन्दोहायै नमः २२०

खड्गखट्वाङ्गखेटिन्यै नमः
खरसन्तापशमन्यै नमः
पीयूषपाथःखन्यै नमः
(पीयूषपाथसां खनये)
गङ्गायै नमः
गन्धवत्यै नमः
गौर्यै नमः
गन्धर्वनगरप्रियायै नमः
गम्भीरांग्यै नमः
गुणमय्यै नमः
गतान्तकायै नमः २३०

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ गतिप्रियायै नमः
गणनाथाम्बिकायै नमः
गीतायै नमः
गद्यपद्यपरिष्टुतायै नमः
गान्धार्यै नमः
गर्भशमन्यै नमः
गतिभ्रष्टगतिप्रियायै नमः
गोमत्यै नमः
गुह्यविद्यायै नमः
गवे नमः २४०

गोप्त्र्यै नमः
गगनगामिन्यै नमः
गोत्रप्रवर्धिन्यै नमः
गुण्यायै नमः
गुणातीतायै नमः
गुणाग्रण्यै नमः
गुहाम्बिकायै नमः
गिरिसुतायै नमः
गोविन्दाङ्घ्रिसमुद्भवायै नमः
गुणनीयचरित्रायै नमः २५०

गायत्र्यै नमः
गिरिशप्रियायै नमः
गूढरूपायै नमः
गुणवत्यै नमः
गुर्व्यै नमः
गौरववर्धिन्यै नमः
ग्रहपीडाहरायै नमः

ॐ गुन्द्रायै नमः
गरघ्न्यै नमः
गानवत्सलायै नमः २६०

घर्महन्त्र्यै नमः
घृतवत्यै नमः
घृततुष्टिप्रदायिन्यै नमः
घण्टारवप्रियायै नमः
घोराघौघविध्वंसकारिण्यै नमः
घ्राणतुष्टिकर्यै नमः
घोषायै नमः
घनानन्दायै नमः
घनप्रियायै नमः
घातुकायै नमः २७०

घूर्णितजलायै नमः
घृष्टपातकसन्तत्यै नमः
घटकोटिप्रपीतापायै नमः
घटिताशेषमङ्गलायै नमः
घृणावत्यै नमः
घृणि(ण)निधये नमः
घस्मरायै नमः
घूकनादिन्यै नमः
घुसृणापिञ्जरतनवे नमः (तन्वै)
घर्घरायै नमः २८०

घर्घरस्वनायै नमः
चन्द्रिकायै नमः
चन्द्रकान्ताम्बवे नमः
चञ्चदापायै नमः (ला)

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ चञ्चलद्युतये नमः
चिन्मय्यै नमः
चितिरूपायै नमः
चन्द्रयुतशताननायै नमः
चाम्पेयलोचनायै नमः
चारवे नमः (वैं) २९०
चार्वङ्ग्यै नमः
चारुगामिन्यै नमः
चार्यायै नमः
चारित्रनिलयायै नमः
चित्रकृते नमः
चित्ररूपिण्यै नमः
चम्प्वै नमः
चन्दनशुच्यम्बवे नमः
चर्चनीयायै नमः
चिरस्थिरायै नमः ३००
चारुचम्पकमालाढ्यायै नमः
चमिताऽशेषदुष्कृतायै नमः
चिदाकाशवहायै नमः
चिन्त्यायै नमः
८चञ्चते नमः
चामरवीजितायै नमः
चोरिताशेषवृजिनायै नमः
चरिताशेषमण्डलायै नमः
छेदिताखिलपापौघायै नमः
छद्मघ्न्यै नमः ३१०

ॐ छलहारिण्यै नमः
छिन्नत्रिविष्टपतलायै नमः
छोटिताशेषबन्धनायै नमः
छुरितामृतधारौघायै नमः
छिन्नैनसे नमः (छातै)
छन्दगामिन्यै नमः
छत्रीकृतमरालौघायै नमः
छटीकृतनिजामृतायै नमः
जाह्नव्यै नमः
ज्यायै नमः ३२०
जगन्मात्रे नमः
जप्यायै नमः
जङ्घालवीचिकायै नमः
जयायै नमः
जनार्दनप्रीतायै नमः
जुषणीयायै नमः
जगद्धितायै नमः
जीवनायै नमः
जीवनप्राणायै नमः
जगते नमः ३३०
ज्येष्ठायै नमः
जगन्मय्यै नमः
जीवजीवातुलतिकायै नमः
जन्मिजन्मनिबर्हण्यै नमः
जाड्यविध्वंसनकर्यै नमः
जगद्योन्यै नमः

८. चञ्चत् – स्फुरत् स्वप्रकाशमित्यर्थः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ जलाविलायै नमः
जगदानन्दजनन्यै नमः
जलजायै नमः
जलजेक्षणायै नमः ३४०

जनलोचनपीयूषायै नमः
जटातटविहारिण्यै नमः
जयन्त्यै नमः
जन्तुपापघ्न्यै नमः
जनितज्ञानविग्रहायै नमः
झल्लरीवाद्यकुशलायै नमः
झलज्झालजलावृतायै नमः
झण्टीशवन्द्यायै नमः
झङ्कारकारिण्यै नमः
झर्झरावत्यै नमः ३५०

टीकिताशेषपातालायै नमः
(एनोद्रिपाटन) टङ्किकायै नमः (ने)
टङ्कारनृत्यकल्लोलायै नमः (त्क)
टीकनीयमहातटायै नमः
डम्बरप्रवहायै नमः
डीनराजहंसकुलाकुलायै नमः
डमड्डमरुहस्तायै नमः
डामरोक्तमहाण्डकायै नमः
ढौकिताशेषनिर्वाणायै नमः
ढक्कानादचलज्जलायै नमः ३६०

ॐ ढुण्ढिविघ्नेशजनन्यै नमः
ढणड्डुणितपातकायै नमः
तर्पण्यै नमः
तीर्थतीर्थायै नमः
त्रिपथायै नमः
त्रिदशेश्वर्यै नमः (दिवे)
त्रिलोकगोप्त्र्यै नमः
तोयेश्यै नमः
त्रैलोक्यपरिवन्दितायै नमः
तापत्रितयसंहर्त्र्यै नमः ३७०

तेजोबलविवर्धिन्यै नमः
त्रिलक्ष्यायै नमः
तारिण्यै नमः
तारायै नमः
तारापतिकरार्चितायै नमः
त्रैलोक्यपावनीपुण्यायै नमः
तुष्टिदायै नमः
तुष्टिरूपिण्यै नमः
तृष्णाच्छेत्र्यै नमः
तीर्थमात्रे नमः ३८०

त्रिविक्रमपदोद्भवायै नमः
तपोमय्यै नमः
तपोरूपायै नमः
तपस्तोमफलप्रदायै नमः
त्रैलोक्यव्यापिन्यै नमः
तृप्त्यै नमः
तृप्तिकृते नमः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ तत्त्वरूपिण्यै नमः
त्रैलोक्यसुन्दर्यै नमः
तुर्यायै नमः ३९०

तुर्यातीतपदप्रदायै नमः
त्रैलोक्यलक्ष्म्यै नमः
त्रिपद्यै नमः
तथ्यायै नमः (तीर्थ्या)
तिमिरचन्द्रिकायै नमः
तेजोगर्भायै नमः
तपःसारायै नमः
त्रिपुरारिशिरोगृहायै नमः
त्रयीस्वरूपिण्यै नमः
तन्व्यै नमः ४००

तपनाङ्गजभीतिनुदे नमः
तरये नमः
तरणिजामित्रायै नमः
तर्पिताशेषपूर्वजायै नमः
तुलाविरहितायै नमः
तीव्रपापतूलतनूनपदे नमः
दारिद्यदमन्यै नमः
दक्षायै नमः (दी)
दुष्प्रेक्ष्यायै नमः
दिव्यमण्डनायै नमः ४१०

दीक्षावत्यै नमः
दुरावाप्यायै नमः
द्राक्षामधुरवारिभृते नमः

ॐ दर्शितानेककुतुकायै नमः
दुष्टदुर्जयदुःखहृते नमः (कृ)
दैन्यहृते नमः
दुरितघ्न्यै नमः
दानवारिपदाब्जजायै नमः
दन्दशूकविषघ्न्यै नमः
दारिताघौघसन्तत्यै नमः ४२०

द्रुतायै नमः
देवद्रुमच्छन्नायै नमः
दुर्वाराघविघातिन्यै नमः
दमग्राह्यायै नमः
देवमात्रे नमः
देवलोकप्रदर्शिन्यै नमः
देवदेवप्रियायै नमः
देव्यै नमः
दिक्पालपददायिन्यै नमः
दीर्घायुःकारिण्यै नमः ४३०

दीर्घायै नमः
दोग्ध्र्यै नमः (ग्द्ध्र्यै)
दूषणवर्जितायै नमः
दुग्धाम्बुवाहिन्यै नमः
दोह्यायै नमः
दिव्यायै नमः
दिव्यगतिप्रदायै नमः
द्युनद्यै नमः
दीनशरणायै नमः
देहिदेहनिवारिण्यै नमः ४४०

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ द्राघीयस्यै नमः
दाघहन्त्र्यै नमः
दितपातकसन्त्यै नमः
दूरदेशान्तरचर्यै नमः
दुर्गमायै नमः
देववल्लभायै नमः
दुर्वृत्तघ्न्यै नमः
दुर्विगाह्यायै नमः (हा)
दयाधारायै नमः
दयावत्यै नमः ४५०

दुरासदायै नमः
दानशीलायै नमः
द्राविण्यै नमः
द्रुहिणस्तुतायै नमः
दैत्यदानवसंशुद्धिकर्त्र्यै नमः
दुर्बुद्धिहारिण्यै नमः
दानसारायै नमः
दयासारायै नमः
द्यावाभूमिविगाहिन्यै नमः
दृष्टादृष्टफलप्राप्त्यै नमः ४६०

देवतावृन्दवन्दितायै नमः
दीर्घव्रतायै नमः
दीर्घदृष्ट्यै नमः
दीप्ततोयायै नमः
दुरालभायै नमः
ॐ दण्डयित्र्यै नमः
दण्डनीत्यै नमः
दुष्टदण्डधरार्चितायै नमः
दुरोदरघ्न्यै नमः
दावार्चिषे नमः ४७०

द्रवते नमः
द्रव्यैकशेवधये नमः
दीनसन्तापशमन्यै नमः
दात्र्यै नमः
[१]दवथुवैरिण्यै नमः
दरीविदारणपरायै नमः
दान्तायै नमः
दान्तजनप्रियायै नमः
दारिताद्रितटायै नमः
दुर्गायै नमः ४८०

दुर्गारण्यप्रचारिण्यै नमः
धर्मद्रवायै नमः
धर्मधुरायै नमः
धेनवे नमः (धेन्वै)
धीरायै नमः
धृत्यै नमः
ध्रुवायै नमः
धेनुदानफलस्पर्शायै नमः (ध्रुव)
धर्मकामार्थमोक्षदायिन्यै नमः
धर्मोर्मिवाहिन्यै नमः ४९०

१. दवथुः – संसारभयजन्यकम्पः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ धुर्यायै नमः
धात्र्यै नमः
धात्रीविभूषणायै नमः
धर्मिण्यै नमः
धर्मशीलायै नमः
धन्विकोटिकृतावनायै नमः
ध्यातृपापहरायै नमः
ध्येयायै नमः
धावन्यै नमः
धूतकल्मषायै नमः ५००

धर्मधारायै नमः
धर्मसारायै नमः
धनदायै नमः
धनवर्धिन्यै नमः (धृति)
धर्माधर्मगुणच्छेत्र्यै नमः
धत्तूरकुसुमप्रियायै नमः
धर्मेश्यै नमः
धर्मशास्त्रज्ञायै नमः
धनधान्यसमृद्धिकृते नमः
धर्मलभ्यायै नमः ५१०

धर्मजलायै नमः
धर्मप्रसवधर्मिण्यै नमः
ध्यानगम्यस्वरूपायै नमः
धरण्यै नमः
धातृपूजितायै नमः
धुरे नमः
धूर्जटिजटासंस्थायै नमः
ॐ धन्यायै नमः
धियै नमः
धारणावत्यै नमः ६२०

नन्दायै नमः
निर्वाणजनन्यै नमः
नन्दिन्यै नमः
नुन्नपातकायै नमः
निषिद्धविघ्ननिचयायै नमः
निजानन्दप्रकाशिन्यै नमः
नभोऽङ्गणचर्यै नमः
नूत्यै नमः
नम्यायै नमः
नारायण्यै नमः ५३०

नुतायै नमः
निर्मलायै नमः
निर्मलाख्यानायै नमः
तापसम्पन्नाशिन्यै नमः
नियतायै नमः
नित्यसुखदायै नमः
नानाश्चर्यमहानिधये नमः
नद्यै नमः
नदीनदसरोमात्रे नमः
नायिकायै नमः ५४०

नाकदीर्घिकायै नमः
नष्टोद्धरणधीरायै नमः
नन्दनायै नमः
नन्ददायिन्यै नमः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ निर्णिक्ताशेषभुवनायै नमः
निःसङ्गायै नमः
निरुपद्रवायै नमः
निरालम्बायै नमः
निष्प्रपञ्चायै नमः
निर्णाशितमहामलायै नमः ५५०
निर्मलज्ञानन्यै नमः
निःशेषप्राणितापहृते नमः
नित्योत्सवायै नमः
नित्यतृप्तायै नमः
नमस्कार्यायै नमः
निरञ्जनायै नमः
निष्ठावत्यै नमः
निरातङ्कायै नमः
निर्लेपायै नमः
निश्चलात्मिकायै नमः ५६०
निरवद्यायै नमः
निरीहायै नमः
नीललोहितमूर्धनायै नमः
नन्दीभृङ्गिगणस्तुत्यायै नमः
नागायै नमः
नन्दायै नमः
नगात्मजायै नमः
निष्प्रत्यूहायै नमः
नाकनद्यै नमः
निरयार्णवदीर्घनाम्न्यै नमः ५७०

ॐ पुण्यप्रदायै नमः
पुण्यगर्भायै नमः
पुण्यायै नमः
पुण्यतरङ्गिण्यै नमः
पृथवे नमः
पृथुफलायै नमः
पूर्णायै नमः
प्रणतार्तिप्रभञ्जिन्यै नमः
प्राणदायै नमः
प्राणिजनन्यै नमः ५८०
प्राणेश्यै नमः
प्राणरूपिण्यै नमः
पद्मालयायै नमः
पराशक्त्यै नमः
पुरजित्परमप्रियायै नमः
[१०]परायै नमः
परफलप्राप्त्यै नमः
पावन्यै नमः
पयस्विन्यै नमः
परानन्दायै नमः ५९०
प्रकृष्टार्थायै नमः
प्रतिष्ठायै नमः
पालन्यै नमः
परायै नमः
पुराणपठितायै नमः
प्रीतायै नमः
प्रणवाक्षररूपिण्यै नमः

१०. परा – परस्वरूपा – पूरयतीति वा – परा

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ पार्वत्यै नमः
प्रेमसम्पन्नायै नमः
पशुपाशविमोचिन्यै नमः
(नाशि) ६००

परमात्मस्वरूपायै नमः
परब्रह्मप्रकाशिन्यै नमः
परमानन्दनिष्पन्दायै नमः
प्रायश्चित्तस्वरूपिण्यै नमः
पानीयरूपनिर्वाणायै नमः
परित्राणपरायणायै नमः
पापेन्धनदवज्वालायै नमः
पापारये नमः
पापनामनुदे नमः
परमैश्वर्यजनन्यै नमः ६१०

प्रज्ञायै नमः
प्राज्ञायै नमः
[११]परापरायै नमः (व)
प्रत्यक्षलक्ष्म्यै नमः
पद्माक्ष्यै नमः
परव्योमामृतस्रवायै नमः
प्रसन्नरूपायै नमः
प्रणिधये नमः
पूतायै नमः
प्रत्यक्षदेवतायै नमः ६२०

ॐ पिनाकिपरमप्रीतायै नमः
परमेष्ठिकमण्डलवे नमः
पद्मनाभपदार्घ्येणप्रसूतायै नमः
पद्ममालिन्यै नमः
परर्धिदायै नमः
पुष्टिकर्यै नमः
पथ्यायै नमः
पूर्त्यै नमः
प्रभावत्यै नमः
पुनानायै नमः ६३०

पीतगर्भघ्न्यै नमः
पापपर्वतनाशिन्यै नमः
फलिन्यै नमः
फलहस्तायै नमः
फुल्लाम्बुजविलोचनायै नमः
फालितैनोमहाक्षेत्रायै नमः
फणिलोकविभूषणायै नमः
फेनच्छलप्रणिन्न्यैनसे नमः
फुल्लकैरवगन्धिन्यै नमः
फेनिलाच्छाम्बुधाराभायै नमः ६४०

फुडुच्चाटितपातकायै नमः
[१२]फाणितस्वादुसलिलायै नमः
[१३]फाण्टपथ्यजलाविलायै नमः

---

११. परापरा – कार्यकारा रूपा, परावरेति पाठे–
पवे हिरण्यगर्भादयः अवराः निकृष्टा यस्यास्सा तथा
१२. फाणितं पक्वान्न विशेषः १३. फाण्टम् – तक्रम्

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ विश्वमात्रे नमः
विश्वेश्यै नमः
विश्वायै नमः
विश्वेश्वरप्रियायै नमः
ब्रह्मण्यायै नमः
ब्रह्मकृते नमः
ब्राह्म्यै नमः ६५०

ब्रह्मिष्ठायै नमः
विमलोदकायै नमः
विभावर्यै नमः
विरजायै नमः
विक्रान्तानेकविष्टपायै नमः
विश्वमित्रायै नमः
विष्णुपद्यै नमः
वैष्णव्यै नमः
वैष्णवप्रियायै नमः
विरूपाक्षप्रियकर्यै नमः ६६०

विभूत्यै नमः
विश्वतोमुख्यै नमः
विपाशायै नमः
वैभुध्यै नमः
वेद्यायै नमः (वै)
वेदाक्षररसस्रवायै नमः
विद्यायै नमः
वेगवत्यै नमः
वन्द्यायै नमः
बृंहण्यै नमः ६७०

ॐ ब्रह्मवादिन्यै नमः
वरदायै नमः
विप्रकृष्टायै नमः
वरिष्ठायै नमः
विशोधिन्यै नमः
विद्याधर्यै नमः
विशोकायै नमः
वयोवृन्दनिषेवितायै नमः
बहूदकायै नमः
बलवत्यै नमः ६८०

व्योमस्थायै नमः
विबुधप्रियायै नमः
वाण्यै नमः
वेदवत्यै नमः
वित्तायै नमः
ब्रह्मविद्यातरङ्गिण्यै नमः
ब्रह्माण्डकोटिव्याप्ताम्बवे नमः
ब्रह्महत्यापहारिण्यै नमः
ब्रह्मेशविष्णुरूपायै नमः
बुद्ध्यै नमः ६९०

विभववर्धिन्यै नमः
विलासिसुखदायै नमः
वैश्यायै नमः
व्यापिन्यै नमः
वृषारण्यै नमः
वृषाङ्कमौलिनिलयायै नमः
विपन्नार्तिप्रभञ्जिन्यै नमः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ विनीतायै नमः
विनतायै नमः
ब्रध्नतनयायै नमः ७००
विनयान्वितायै नमः
विपञ्चीरूपायै नमः
वाद्यकुशलायै नमः
वेणुश्रुतिविचक्षणायै नमः
वर्चस्कर्यै नमः
बलकर्यै नमः
बलोन्मूलितकल्मषायै नमः
विपाप्मायै नमः
विगतातङ्कायै नमः
विकल्पपरिवर्जितायै नमः ७१०
वृष्टिकर्त्र्यै नमः
वृष्टिजलायै नमः
विधये नमः
विच्छिन्नबन्धनायै नमः
व्रतरूपायै नमः
वित्तरूपायै नमः
बहुरूपायै नमः
बहुविघ्नविनाशकृते नमः
वसुधारायै नमः
वसुमत्यै नमः ७२०
विचित्राङ्ग्यै नमः
विभावसवे नमः
विजयायै नमः
विश्वबीजायै नमः

ॐ वामदेव्यै नमः
वरप्रदायै नमः
वृषाश्रितायै नमः
विषघ्न्यै नमः
विज्ञानोर्म्यंशुमालिन्यै नमः
भव्यायै नमः ७३०
भोगवत्यै नमः (भा)
भद्रायै नमः
भवान्यै नमः
भूतभाविन्यै नमः
भूतधात्र्यै नमः
भयहरायै नमः
भक्तदारिद्र्यघातिन्यै नमः
भुक्तिमुक्तिप्रदायै नमः
भेश्यै नमः
भक्तस्वर्गापवर्गदायै नमः ७४०
भागीरथ्यै नमः
भानुमत्यै नमः
भाग्यायै नमः
भोगवत्यै नमः
भृत्यै नमः
भवप्रियायै नमः
भवद्वेष्ट्र्यै नमः
भूतिदायै नमः
भूतिभूषणायै नमः (दक्षि)
भाललोचनभावज्ञायै नमः ७५०

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ भूतभव्यभवत्प्रभवे नमः
भ्रान्तिज्ञानप्रशमन्यै नमः
भिन्नब्रह्माण्डमण्डपायै नमः
भूरिदायै नमः
भक्तिसुलभायै नमः
भाग्यवद्दृष्टिगोचर्यै नमः
भञ्जितोपप्लवकुलायै नमः
भक्ष्यभोज्यसुखप्रदायै नमः
भिक्षणीयायै नमः
भिक्षुमात्रे नमः ७६०

भावायै नमः
भावस्वरूपिण्यै नमः
मन्दाकिन्यै नमः
महानन्दायै नमः
मात्रे नमः
मुक्तितरङ्गिण्यै नमः
महोदयायै नमः
मधुमत्यै नमः
महापुण्यायै नमः
मुदाकर्य्यै नमः (रायै) ७७०

मुनिस्तुतायै नमः
मोहहन्त्र्यै नमः
महातीर्थायै नमः
मधुस्रवायै नमः
माधव्यै नमः
मानिन्यै नमः
मान्यायै नमः

ॐ मनोरथपथातिगायै नमः
मोक्षदायै नमः
मुख्यायै नमः ७८०

महाभाग्यजनाश्रितायै नमः
महावेगवत्यै नमः
मेध्यायै नमः
महायै नमः
महिमभूषणायै नमः
महाप्रभावायै नमः
महत्यै नमः
मीनचञ्चललोचनायै नमः
महाकारुण्यसम्पूर्णायै नमः
महर्धये नमः ७९०

महोत्पलायै नमः
मूर्तिमते नमः
मुक्तिरमण्यै नमः
मणिमाणिक्यभूषणायै नमः
मुक्तकलापनेपथ्यायै नमः
मनोनयननन्दिन्यै नमः
महापातकराशिघ्न्यै नमः
महादेवार्धहारिण्यै नमः
महोर्मिमालिन्यै नमः
मुक्तायै नमः ८००

महादेव्यै नमः
मनोन्मन्यै नमः
महापुण्योदयप्राप्यायै नमः
मायातिमिरचन्द्रिकायै नमः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ महाविद्यायै नमः
महामायायै नमः
महामेधायै नमः
महौषधायै नमः
मालाधर्यै नमः
महोपायायै नमः ८१०

महोरगविभूषणायै नमः
महामोहप्रशमिन्यै नमः
महामङ्गलमङ्गलायै नमः
मार्ताण्डमण्डलचर्यै नमः
महालक्ष्म्यै नमः
मदोज्झितायै नमः
यशस्विन्यै नमः
यशोदायै नमः
योग्यायै नमः
युक्तात्मसेवितायै नमः ८२०

योगसिद्धिप्रदायै नमः
याज्यायै नमः
यज्ञेशपरिपूरितायै नमः
यज्ञेश्यै नमः
यज्ञफलदायै नमः
यजनीयायै नमः
यशस्कर्यै नमः
यमिसेव्यायै नमः
योगयोन्यै नमः
योगिन्यै नमः ८३०

ॐ युक्तबुद्धिदायै नमः
योगज्ञानप्रदायै नमः
युक्तायै नमः
यमाद्यष्टाङ्गयोगयुजे नमः
यन्त्रिताघौघसञ्चारायै नमः
यमलोकनिवारिण्यै नमः
यात्राऽयातप्रशमन्यै नमः
[१४]यातनानामकृन्तन्यै नमः
यामिनीशहिमाच्छोदायै नमः
युगधर्मविवर्जितायै नमः ८५०

रेवत्यै नमः
रतिकृते नमः
रम्यायै नमः
रत्नगर्भायै नमः
रमायै नमः
रत्यै नमः
रत्नाकरप्रेमपत्न्यायै नमः
रसज्ञायै नमः
रसरूपिण्यै नमः
रत्नप्रसादगर्भायै नमः (प्र) ८५०

रमणीयतरङ्गिण्यै नमः
रत्नार्चिषे नमः
रुद्ररमण्यै नमः
रागद्वेषविनाशिन्यै नमः

१४. यातनामूल निकृन्तन्यै यातनानां निकृन्तन्यै

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ रमायै नमः
रामायै नमः
रम्यरूपायै नमः
रोगिजीवातुरूपिण्यै नमः
रुचिकृते नमः
रोचन्यै नमः ८६०
रम्यायै नमः
रुचिरायै नमः
रोगहारिण्यै नमः
राजहंसायै नमः
रत्नवत्यै नमः
राजत्कल्लोलराजिकायै नमः
रामणीयकरेखायै नमः (वेषायै)
रुजार्यै नमः
रोगरोपिण्यै नमः (षशो)
राकायै नमः ८७०
रङ्कार्तिशमन्यै नमः
रम्यायै नमः
रोलम्बराविण्यै नमः
रागिण्यै नमः
रञ्जितशिवायै नमः
रूपलावण्यशेवधये नमः
लोकप्रस्व्यै नमः
लोकवन्द्यायै नमः
लोलत्कल्लोलमालिन्यै नमः
लीलावत्यै नमः ८८०

ॐ लोकभूम्यै नमः
लोकलोचनचन्द्रिकायै नमः
लेखस्रवन्त्यै नमः
लटभायै नमः (भियै)
लघुवेगायै नमः
लघुत्वहृते नमः
लास्यत्तरङ्गहस्तायै नमः
ललितायै नमः
लयभङ्गिकायै नमः
लोकबन्धवे नमः ८९०
लोकधात्र्यै नमः
लोकोत्तरगुणोर्जितायै नमः
लोकत्रयहितायै नमः
लोकायै नमः
लक्ष्म्यै नमः
लक्षणलक्षितायै नमः
लीलायै नमः
लक्षितनिर्वाणायै नमः
लावण्यामृतवर्षिण्यै नमः
वैश्वानर्यै नमः ९००
वासवेद्यायै नमः
वन्ध्यत्वपरिहारिण्यै नमः
वासुदेवाङ्घ्रिरेणुघ्न्यै नमः
वज्रिवज्रनिवारिण्यै नमः
शुभावत्यै नमः
शुभफलायै नमः
शान्त्यै नमः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ शन्तनुवल्लभायै नमः (शा)
शूलिन्यै नमः
शैशववयसे नमः ९१०
शीतलामृतवाहिन्यै नमः
शोभावत्यै नमः
शीलवत्यै नमः
शोषिताशेषकिल्बिषायै नमः
शरणायै नमः
शिवदायै नमः
शिष्टायै नमः
शरजन्मप्रस्व्यै नमः
शिवायै नमः
शक्तये नमः (शक्त्यै) ९२०
शशाङ्कविमलायै नमः
शमनस्वसृसम्मतायै नमः
शमायै नमः
शमनमार्गघ्नायै नमः
शितिकण्ठमहाप्रियायै नमः
शुचये नमः (च्यै)
शुचिकर्यै नमः
शेषायै नमः (शुघ्न्यै)
शेषशायिपदोद्भवायै नमः
श्रीनिवासश्रुत्यै नमः ९३०
श्रद्धायै नमः
श्रीमत्यै नमः
श्रियै नमः

ॐ शुभव्रतायै नमः
शुद्धविद्यायै नमः
शुभावर्तायै नमः
श्रुतानन्दायै नमः
श्रुतिस्तुत्यै नमः
शिवेरघ्न्यै नमः
शबर्यै नमः ९४०
शाम्बरीरूपधारिण्यै नमः
श्मशानशोधिन्यै नमः
शान्तायै नमः
[१५]शश्वन्नमः
शतधृतिस्तुतायै नमः
शालिन्यै नमः
शालिशोभाढ्यायै नमः
शिखिवाहनगर्भभृते नमः
शंसनीयचरित्रायै नमः
शातिताशेषपातकायै नमः ९५०
षड्गुणैश्वर्यसम्पन्नायै नमः
षडङ्गश्रुतिरूपिण्यै नमः
षण्डताहारिसलिलायै नमः
ष्टयायन्नदनदीशतायै नमः
सरिद्वरायै नमः
सुरसायै नमः
सुप्रभायै नमः
सुरदीर्घिकायै नमः
स्वःसिन्धवे नमः
सर्वदुःखघ्न्यै नमः ९६०

१५. शश्वत्-नित्या, अव्ययमिदम्

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ सर्वरोगमहौषधायै नमः
सेव्यायै नमः
सिद्ध्यै नमः
सत्यै नमः
सूक्तये नमः
स्कन्दसुवे नमः
सरस्वत्यै नमः
सम्पत्तरङ्गिण्यै नमः
स्तुत्यायै नमः
स्थाणुमौलिकृतालयायै नमः १७०
स्थैर्यदायै नमः
सुभगायै नमः
सौख्यायै नमः
स्त्रीषुसौभाग्यदायिन्यै नमः
स्वर्गनिश्रेणिकायै नमः
सूक्ष्मायै नमः
स्वधायै नमः (स्वधा)
स्वाहायै नमः (स्वाहा)
सुधाजलायै नमः
समुद्ररूपिण्यै नमः (पूरि) १८०

ॐ स्वर्ग्यायै नमः
सर्वपातकवैरिण्यै नमः
स्मृताघहारिण्यै नमः
सीतायै नमः
संसाराब्धितरण्डिकायै नमः (काय)
सौभाग्यसुन्दर्यै नमः
सन्ध्यायै नमः
सर्वसारसमन्वितायै नमः
हरप्रियायै नमः
हृषीकेश्यै नमः १९०
हंसरूपायै नमः
हिरण्मय्यै नमः
हृताघसङ्घायै नमः
हितकृते नमः
हेलायै नमः
हेलाघगर्वहृते नमः
क्षेमदायै नमः
क्षालिताघौघायै नमः
क्षुद्रविद्राविण्यै नमः
क्षमायै नमः १०००

॥ इति सहस्रनामपूजां समर्पयामि ॥

॥ अष्टोत्तरशतनामपूजां करिष्ये ॥

ॐ गङ्गायै नमः
विष्णुपादब्जसम्भूतायै नमः
हरवल्लभायै नमः
हिमाचलेन्दुतनयायै नमः
गिरिमण्डलगामिन्यै नमः

ॐ तारकारातिजनन्यै नमः
सगरात्मजतारकायै नमः
सरस्वतीसमायुक्तायै नमः
सुघोषायै नमः
सिन्धुगामिन्यै नमः १०

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ भागीरथ्यै नमः
भगवत्यै नमः
भगीरथरथानुगायै नमः
त्रिविक्रमपदोद्भूतायै नमः
त्रिलोकपथगामिन्यै नमः
क्षीरशुभ्रायै नमः
बहुक्षीरायै नमः
क्षीरवृक्षसमाकुलायै नमः
त्रिलोचनजटावासिन्यै नमः
ऋणत्रयविमोचिन्यै नमः २०

त्रिपुरारिशिरश्चूडायै नमः
जाह्नव्यै नमः
नरभीतिहृते नमः
अव्ययायै नमः
नयनानन्ददायिन्यै नमः
नगपुत्रिकायै नमः
निरञ्जनायै नमः
नित्यशुद्धायै नमः
नीरजालिपरिष्कृतायै नमः
सावित्र्यै नमः ३०

सलिलावासायै नमः
सागराम्बुसमेदिन्यै नमः
रम्यायै नमः
बिन्दुसरसे नमः
अव्यक्तायै नमः
वृंदारकसमाश्रितायै नमः
ॐ उमासपत्न्यै नमः
शुभ्राङ्ग्यै नमः
श्रीमत्यै नमः
धवलाम्बरायै नमः ४०

आखण्डलवनवासायै नमः
खण्डेन्दुकृतशेखरायै नमः
अमृताकारसलिलायै नमः
लीलालङ्घितपर्वतायै नमः
विरिञ्चिकलशावासायै नमः
त्रिवेण्यै नमः
त्रिगुणात्मिकायै नमः
सङ्गताघौघशमन्यै नमः
शङ्खदुन्दुभिनिस्वनायै नमः
भीतिहन्त्र्यै नमः ५०

भाग्यजनन्यै नमः
भिन्नब्रह्माण्डदर्पिण्यै नमः
आनन्दिन्यै नमः
शीघ्रगायै नमः
सिद्धायै नमः
शरण्यायै नमः
शशिशेखरायै नमः
शाङ्कर्यै नमः
शफरीपूर्णायै नमः
भर्गमूर्ध्नि कृतालयायै नमः ६०

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ भवप्रियायै नमः
सत्यसन्धप्रियायै नमः
हंसस्वरूपिण्यै नमः
भगीरथभृतायै नमः
अनन्तायै नमः
शरच्चन्द्रनिभाननायै नमः
ओङ्काररूपिण्यै नमः
अतुलायै नमः
क्रीडाकल्लोलकारिण्यै नमः
स्वर्गसोपानसरण्यै नमः ७०

सर्वदेवस्वरूपिण्यै नमः
अम्भःप्रदायै नमः
दुःखहंन्त्र्यै नमः
शान्तिसन्तानकारिण्यै नमः
दारिद्र्यहन्त्र्यै नमः
शिवदायै नमः
संसारविषनाशिन्यै नमः
प्रयागनिलयायै नमः
शीतायै नमः
तापत्रयविमोचिन्यै नमः ८०

शरणागतदीनार्तपरित्राणायै नमः
सुमुक्तिदायै नमः
सिद्धियोगनिषेवितायै नमः
पापहन्त्र्यै नमः
ॐ पावनाङ्ग्यै नमः
परब्रह्मस्वरूपिण्यै नमः
पूर्णायै नमः
पुरातनायै नमः
पुण्यायै नमः
पुण्यदायै नमः ९०

पुण्यवाहिन्यै नमः
पुलोमजार्चितायै नमः
पूतायै नमः
पूतत्रिभुवनायै नमः
जयायै नमः
जङ्गमायै नमः
जङ्गमाधारायै नमः
जलरूपायै नमः
जगद्धितायै नमः
जह्नुपुत्र्यै नमः १००

जगन्मात्रे नमः
जम्बूद्वीपविहारिण्यै नमः
भवपत्न्यै नमः
भीष्ममात्रे नमः
सिद्धायै नमः
रम्यरूपधृतायै नमः
उमाकरकमलसञ्जातायै नमः
अज्ञानतिमिरभानवे नमः १०८

॥ इति अष्टोत्तरशतनामपूजां समर्पयामि ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

॥ अथ धूपमाघ्रापयामि ॥

चन्दनागरुमुस्तादि घृतगुग्गुलुसंयुतम् ।
दशाङ्गद्रव्यसंयुक्तं धूपोऽयं प्रतिगृह्यताम् ॥
कर्दमेन... मालिनीम् ॥
वनस्पतिरसोत्पन्नो... प्रतिगृह्यताम् ॥
धूरसिधूर्व धूर्वन्तं... देवानामसि ॥
श्रीगङ्गायै नमः ॥ धूपमाघ्रापयामि ॥
(ॐ विज्यं धनुः... निषङ्गथिः ॥ श्रीगङ्गाविश्वे... धूपं...)

॥ अथ दीपः ॥

आपः सृजन्तु... कुले ॥
साज्यं त्रिवर्तिसंयुक्तं... तिमिरापहे ।
उद्दीप्यस्व... दिशो दश ॥
श्री गङ्गायै नमः ॥ दीपं दर्शयामि ।
(ॐ या ते हेतिः... परिब्भुज । श्री गङ्गाविश्वे... दीपं...)

॥ अथ नैवेद्यम् ॥

ॐ आर्द्रां पुष्करिणीं... म आवह ॥
शाल्यन्नं व्यञ्जनैर्युक्तं घृतमापसमन्वितम् ।
क्षीरान्नममृतोपेतं भुज्यताममृताशनि ॥
नैवेद्यं कृत्वा, स्थलशुद्धिं कृत्वा
(ॐ नमस्ते अस्त्वायुधाया... धन्वने । श्री गङ्गाविश्वेश्व... नैवेद्यं)
(नरौघाघविनाशिन्यै तरङ्गिण्यै नमो नमः ।
तुभ्यमापोशनं दास्ये स्वीकुरु श्रीहरप्रिये ॥
उत्तरापोशनं समर्पयामि)

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

हस्तप्रक्षालनं समर्पयामि । मुखप्रक्षालनं समर्पयामि ।
पूगीफलसमायुक्तं नागवल्लीदलैर्युतम् ।
कर्पूरचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥
ॐ आर्द्रां यः करिणीं... म आवह ॥
श्री गङ्गायै नमः क्रमुकताम्बूलं समर्पयामि ।
(ॐ परिते धन्वनो... धेहि तम् । श्री गङ्गाविश्वे... ताम्बूलम् ।
श्री गङ्गायै नमः महादक्षिणां समर्पयामि ।
श्री गङ्गायै नमः फलनैवेद्यं समर्पयामि ।

॥ अथ मङ्गलनीराजनम् ॥

ॐ तां म आवह... पुरुषानहम् ॥
ॐ हिरण्यपात्रं... तेजो ददाति ॥
ॐ आशास्तेऽयं... नमो देवेभ्यः ।
ॐ ध्रुवं ते राजा... ध्रुवम् ॥
इत्यादि मङ्गलार्तिक्यमन्त्रैः नीराजनं कृत्वा ।

॥ अथ मन्त्रपुष्पम् ॥

मन्त्रपुष्पं प्रयच्छामि भक्ताभीष्टप्रदायिनि ।
मल्लिकाशोकपुन्नागैः मरुगैः शतपत्रकैः ॥
ॐ गणानां त्वा... ।
ॐ योऽपां पुष्पं वेद... आयतनवान्भवति ।
ॐ यो वेदादौ... महेश्वरः ॥
ॐ यः शुचि... जपेत् ॥
श्री गङ्गायै नमः मन्त्रपुष्पं समर्पयामि ॥
(ॐ अघोरेभ्योऽथ... रुद्ररूपेभ्यः ।
श्री गङ्गाविश्वे... मन्त्रपुष्पं समर्पयामि ।)
गङ्गे त्रिपथगे दिव्ये जाह्नवी त्रिदिवस्थिते ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

प्रदक्षिणं करोमि त्वां प्रणताघौघनाशिनि ॥
नमस्ते जगदाधारे विश्वरूपे सदाशिवे ।
विश्वनाथे महादेवि करुणाकरि शाम्भवि ॥
यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि तानि विनश्यन्ति प्रदक्षिणंपदे पदे ॥
श्री गङ्गायै नमः प्रदक्षिणं समर्पयामि ॥
(ॐ सहस्राणि सहस्रधा... मुखा कृधि ॥
श्री गङ्गाविश्वेश्वराय... प्रदक्षिणं...)
पाहि पाहि जगद्वन्द्ये भवतापनिवारिणि ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं सदाशिवे ॥
नमस्ते देवदेवेशि नमस्ते करुणाकरे ।
नमस्ते जगदानन्दे नमस्तस्यै नमो नमः ॥
श्री गङ्गायै नमः नमस्कारं समर्पयामि ॥

॥ अथ अर्घ्यप्रदानम् ॥

जह्नुपुत्रि महादेवि जगद्धात्रि महाबले ।
गन्धपुष्पफलैर्युक्तं गृहाणार्घ्यं नमोऽस्तु ते ॥
श्री गङ्गायै नमः इदमर्घ्यमिदमर्घ्यम् ॥
एवं त्रिवारं अर्घ्यं (दत्वा) दद्यात् ॥

॥ अथ प्रार्थना ॥

ॐ पद्मानने पद्मऊरू... आयुश्मन्तं करोतु माम् ॥
आदावादि पितामहस्य निगमव्यापारपात्रे जलम्
पश्चात्पन्नगशायिनो भगवतः पादोदकं पावनम् ।
भूयःशम्भुजटाविभूषणमणिः जह्नोर्महर्षेरियम्
कन्या कल्मषनाशिनी भगवती भागीरथी पातु माम् ॥
शैलेन्द्रादवतारिणी निजजले मज्जज्जनोत्तारिणी

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

पारावारविहारिणी भवभयश्रेणी समुत्सारिणी ।
शेषाहेरनुकारिणी हरशिरोवल्लीदलाकारिणी ।
काशीप्रान्तविहारिणी विजयते गङ्गा मनोहारिणी ॥
मातर्जह्नुमहर्षिपुत्रिवसुधाशृङ्गारहारावलि
स्वर्गारोहणवैजयन्तिभवतीं भागीरथीं प्रार्थये ।
त्वत्तीरे वसतस्त्वदम्बुपिबतस्त्वद्वीचिषु प्रेङ्खतः ।
त्वन्नामस्मरतस्त्वदर्पितदृशः स्यान्मे शरीरव्ययः ॥
(गङ्गाष्टकैर्वा प्रार्थयेत्)
श्रद्धां मेधां... परमेश्वरि ॥ मन्त्रहीनं... अज्ञानाद्वा... ॥
श्री गङ्गायै नमः प्रार्थनां समर्पयामि ॥
प्रदक्षिण – नमस्कारादि सर्वोपचार – पूजाः समर्पयामि ॥
उत्तर(प्रसन्न)पूजां करिष्ये ।
ॐ सुमुखाय नमः... गणपतये नमः ।
प्रसन्नपूजां समर्पयामि । प्रसन्नार्घ्यं समर्पयामि ॥
ॐ गङ्गायै नमः । ॐ जह्नुकन्यायै नमः ।
ॐ भीष्मजनन्यै नमः । ॐ आदिपितामहकमण्डलुकणिकायै नमः ।
ॐ काशीप्रान्तविहारिण्यै नमः ।
ॐ शुभ्रवर्णायै नमः । ॐ शिवायै नमः
ॐ भगीरथानुगायै नमः । ॐ तरलतरतरङ्गायै नमः ।
ॐ पितृप्रियायै नमः । ॐ मन्दाकिन्यै नमः ।
ॐ विजयन्निम्नगायै नमः ॥
ॐ श्रीगङ्गायै नमः । प्रसन्नपूजां (उत्तर पूजां) समर्पयामि ।
प्रसन्नार्घ्यं समर्पयामि ॥
यस्य स्मृत्या च... अच्युतम् ॥ कायेन वाचा... समर्पयामि ।
अस्मिन्वर्तमान... श्रीगङ्गा कल्पोक्तपूजाराधनकर्मणा

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

श्रीगङ्गा (श्रीपरमेश्वरः, श्रीगङ्गाविश्वेश्वरः)

प्रीयताम् ॥ ॐ तत्सत् ॥ ब्रह्मार्पणमस्तु ॥

पूजाकाले स्वरवर्णबिन्दुविसर्ग... नामत्रयजपं करिष्ये ।

ॐ अच्युताय नमः ... नामत्रयजपं कृत्वा ।

गोत्रप्रवरमुक्त्वा अभिवाद्य । शङ्खतीर्थं प्रोक्ष्य ।

प्रसीद! प्रसादान् देहि! इति तीर्थप्रसादादिकं सर्वेभ्यः दत्वा, दक्षिणां दत्वा आशीः संप्रार्थ्य तीर्थप्रोक्षणं, प्राशनं, प्रसादग्रहणं च कृत्वा

श्रद्धां मेधां... परमेश्वरि... । ॐ उत्तिष्ठ ब्रह्मणस्पते... सचा ।

यान्तु देव... पुनरागमनाय च । इति घण्टानादपुरस्सरं उद्वास्य कलशं आचार्याय दत्वा । आचामेत् ॥

यथाशक्ति ब्राह्मणान् सुवासिनीः च भोजयेत् ।

॥ इति श्रीगङ्गाकल्पोक्तपूजाविधिः ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

काश्यादितीर्थक्षेत्रयात्राप्रस्थानविधिः[1]

आचम्य पवित्रपाणिः गुर्वाद्यभिवन्दनं जलशुद्ध्यादिकं च कृत्वा अक्षतान् गृहीत्वा

सङ्कल्पः

'सुमुखश्चैकदन्तश्च...' शुभतिथौ, (नक्षत्र–राशि–नामोच्चारणं कृत्वा) अस्मत्पितृमातृवंशजातानां दिवि भुवि तिर्यङ्नरकादिषु वासिनां अन्ये च अस्मत्पूर्वजातानामुत्तमलोकावाप्त्यर्थं समस्तपूर्वजोद्धारार्थं नान्दीमुखाश्रुमुखपितृप्रीत्यर्थं ऊष्मपो यमोंगिरस्वान् अग्निष्वात्तोग्निः कव्यवाहनादयो ये पितरस्तेषामविच्छिन्नप्रसादसिद्ध्यर्थं असृग्भागि-लेपभागि–पिण्डभागि–विप्रोच्छिष्टभागि–प्रभृतीनामक्षय्यतृप्त्यर्थं

---

१. तीर्थयात्रा

कूर्मपुराणे

गङ्गादि तीर्थेषु वसन्ति मत्स्या
देवालये पक्षिगणाश्च सन्ति ।
भावं ततो हृत्कमले निधाय
तीर्थानि सेवेत समाहितापः ॥
(पुण्यतीर्थेषु भावनयैव फलमिति तात्पर्यम्)
अथ पुण्याहवाचनं
सम्पूज्य गन्धमाल्याद्यैर्ब्राह्मणान् स्वस्ति वाचयेत् ।
धर्मकर्मणि माङ्गल्ये सङ्ग्रामेऽद्भुत दर्शने ॥ इति ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

नानापुण्यनदीस्नान पूजाफलसिद्ध्यर्थं मम जन्मप्रभृत्यद्य यावत् ज्ञाताज्ञात–कामाकाम–सकृदसकृत्कृत–कायिक–वाचिक–मानसिक–सांसर्गिक–स्पृष्टास्पृष्ट–पीतापीत–भुक्ताभुक्त–सकलपापकोपपातक–लघुपातक–सङ्करीकरण–मलिनीकरणापात्रीकरण–जातिभ्रंशकरादीनां स्वतः परप्रेरणया वा सम्भावितानां सकलविधपापानां परिहारार्थं यमुना–सरस्वती–चन्द्रभागाख्य–महापुण्य–नदीस्नानकल्पोक्तफलसिध्यर्थं वेत्रवती–मलापहा–फल्गुनी–कृष्णाख्य–पवित्रनदीक्षेत्रयात्राफलसिध्यर्थं शुतुद्री–गोदावरी–मरुद्वृधाख्यपवित्रनदीतीर्थ–मज्जन–शतफलसिध्यर्थं भीमरथी–सीता–चर्मण्वती–नर्मदाख्य–पुण्यनदीमाहात्म्यश्रवणफलावाप्त्यर्थं पयोष्णी–विपाशा–ताम्रपर्णेति तत्तन्नदीकल्पोक्ततत्तत्फलसिध्यर्थं कावेरी–करतोया–नेत्रवत्यादि–नदीविशेष–तीर्थविशेष–स्नानतर्पणफलप्राप्त्यर्थं गङ्गाविश्वेश्वरप्रीत्यर्थं काशी–गया–प्रयागादितीर्थयात्राप्रस्थानमहं करिष्ये ।
इति सङ्कल्प्य

(पुनश्चाक्षतान् गृहीत्वा)

तीर्थक्षेत्रयात्राकाले सम्भाव्यमान चोरभय–विद्युद्भय–धूर्त–मूर्ख–पाषण्ड–दस्यु–वञ्चकभय–व्याघ्रोपद्रव–भूतोपद्रव–प्रेत–पिशाच–वेताल–ब्रह्मराक्षसाद्युपद्रवनिरासार्थं वाहनचलनकाले विपरीतगमनोन्मार्गगमन–कुमार्गप्रपतन–विमार्गगमनोत्पथप्रवृत्यादिदोषनिवारणार्थं वाहनप्रकम्प–नोत्कम्प–क्षेप–विक्षेप–दोषप्रतिबन्धार्थं सुखप्रयाणसिध्यर्थं प्रयाणकाले समस्तगो–विप्र–प्रसादसिद्ध्यर्थं सकलदेवतानुग्रह प्राप्त्यर्थं सकल–ब्राह्मणजन–ऋषिजन–बहुश्रुत–ब्राह्मणजनानां शुभाशीर्वादप्राप्त्यर्थं कुलदेवताप्रीत्यर्थं इष्टदेवता प्रसादसिद्ध्यर्थं च सकलदेवानां ग्रहाणां च आनुकूल्यसिध्यर्थं च (विप्रजनपूजनं) नान्दीमुखपितृपरितोषणं (च) करिष्ये । तदादौ निर्विघ्नतासिद्ध्यर्थं गणपति पूजां करिष्ये । इति सङ्कल्प्य, तत्कृत्वा विप्रजनपूजां कुर्यात् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

॥ विप्रजनपूजा ॥

चतुरो विप्रान् उदङ्मुखानुपवेश्य स्वयं प्राङ्मुख उपविश्य.

॥ श्लोकः ॥

उच्चैर्गतिर्जगति सिध्यति धर्मतश्चेत्
तस्य प्रमा च वचनैः कृतकेतरैश्चेत् ।
तेषां प्रकाशनदशा च महीसुरैश्चेत्
तानन्तरेण निपतेत् क्व नु मत्प्रणामः ॥

इति नमस्कृत्य

ॐ विप्र पुङ्गवेभ्यो नमः पाद्यं समर्पयामि ।
ॐ द्विजोत्तमेभ्यो नमः अर्घ्यं समर्पयामि ।
ॐ महीसुरेभ्यो नमः आचमनीयं समर्पयामि ।
ॐ यज्ञसूत्रशोभितेभ्यो नमः उपवीतं समर्पयामि ।
ॐ गन्धानुलिप्तेभ्यो नमः गन्धं समर्पयामि ।
ॐ षट्कर्मनिरतेभ्यो नमः अक्षतान् समर्पयामि ।
ॐ बहुश्रुतेभ्यो नमः अलङ्कारान् समर्पयामि ।
ॐ श्रुतिभूषणेभ्यो नमः पुष्पाणि समर्पयामि ।
ॐ शास्त्रनेत्रेभ्यो नमः धूपं आघ्रापयामि ।
ॐ वेदचक्षुर्भ्यो नमः दीपं दर्शयामि ।
ॐ अनर्घ्यवैभवेभ्यो नमः पुनरर्घ्यं समर्पयामि ।

॥ अथ पादपूजा ॥

आधिव्याधिहरं... अच्युतं पदम् ॥ श्रीपादपद्माभ्यां नमः ।
गोत्रप्रवरमुक्त्वा अभिवाद्य इत्यादि... ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ अध्यात्मवित्तमेभ्यो नमः इदं वोऽष्टार्घ्यं सम्पूर्णमस्त्विति भवन्तो ब्रुवन्तु... ।

ॐ 'हिरण्यगर्भगर्भस्थं.... प्रयच्छ मे ।'

यात्राकाले समस्तविप्रप्रसादसिध्यर्थं नानानामगोत्रेभ्यो ब्राह्मणेभ्यो यथाशक्ति हिरण्यं, (वस्त्रं, गोदानं, सुवर्णदानं वा... ।) सम्प्रददे श्रियै न मम । इति दत्वा, अक्षतान् दत्वा,

ॐ नवो नवो भवति... दीर्घमायुः । इत्याशीः सम्प्रार्थ्य, गणपतये नमः प्रसन्नपूजां समर्पयामि, प्रसन्नार्घ्यं समर्पयामि । इति प्रसन्नपूजां कृत्वा यस्य स्मृत्या... अच्युतम्, अनेन काश्यादि तीर्थक्षेत्रयात्रा-प्रस्थानाङ्गत्वेन महागणाधीश्वरपूजापूर्वक विप्रजनपूजनकर्मणा श्रीपरमेश्वरः प्रीयतां ॐ तत्सत् । इति ब्रह्मार्पणं कृत्वा । प्रसादं स्वीकृत्य । पुण्याहवाचनं कृत्वा (तत्र नान्दीमुखाः पितरः प्रीयतां इति विशेषः) नान्दीश्राद्धं च कुर्यात् ।

॥ इति काश्यादितीर्थक्षेत्रयात्राप्रस्थानविधिः ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

॥ श्रीकालभैरवाष्टकम् ॥

देवराजसेव्यमानपावनान्घ्रिपङ्कजम् ।
व्यालयज्ञसूत्रमिन्दुशेखरम् कृपाकरम् ॥
नारदादियोगिवृन्दवन्दितम् दिगम्बरम् ।
काशिकापुराधिनाथकालभैरवम् भजे ॥ १ ॥

भानुकोटिभास्वरम् भवाब्धितारकम् परम् ।
नीलकण्ठमीप्सितार्थदायकम् त्रिलोचनम् ॥
कालकालमम्बुजाक्षमक्षशूलमक्षरम् ।
काशिकापुराधिनाथकालभैरवम् भजे ॥ २ ॥

शूलटण्कपाशदन्डपाणिमादिकारणम् ।
श्यामकायमादिदेवमक्षरम् निरामयम् ॥
भीमविक्रमम् प्रभुम् विचित्रताण्डवप्रियम् ।
काशिकापुराधिनाथकालभैरवम् भजे ॥ ३ ॥

भुक्तिमुक्तिदायकम् प्रशस्तचारुविग्रहम् ।
भक्तवत्सलम् स्थिरम् समस्तलोकविग्रहम् ॥
निक्वणन्मनोज्ञहेमकिङ्किणीलसत्कटिम् ।
काशिकापुराधिनाथकालभैरवम् भजे ॥ ४ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

धर्मसेतुपालकम् त्वधर्ममार्गनाशकम् ।
कर्मपाशमोचकम् सुशर्मदायकम् विभुम् ॥
स्वर्णवर्णकेशपाशशोभिताङ्गमण्डलम् ।
काशिकापुराधिनाथकालभैरवम् भजे ॥ ५ ॥

रत्नपादुकाप्रभाभिरामपादयुग्मकम् ।
नित्यमद्वितीयमिष्टदैवतम् निरन्जनम् ॥
मृत्युदर्पनाशनम् करालदम्ष्ट्रभूषणम् ।
काशिकापुराधिनाथकालभैरवम् भजे ॥ ६ ॥

अट्टहासभिन्नपद्मजाण्डकोशसन्ततिम् ।
दृष्टिपातनष्टपापजालमुग्रशासनम् ॥
अष्टसिद्धिदायकम् कपालमालिकाधरम् ।
काशिकापुराधिनाथकालभैरवम् भजे ॥ ७ ॥

भूतसङ्घनायकम् विशालकीर्तिदायकम् ।
काशिवासलोकपुण्यपापशोधकम् विभुम् ॥
नीतिमार्गकोविदम् पुरातनम् जगत्पतिम् ।
काशिकापुराधिनाथकालभैरवम् भजे ॥ ८ ॥

कालभैरवाष्टकं पठन्ति ये मनोहरम् ।
ज्ञानमुक्तिसाधनम् विचित्रपुण्यवर्धनम् ॥
शोकमोहदैन्यलोभकोपतापनाशनम् ।
ते प्रयान्ति कालभैरवान्घ्रिसन्निधिम् ध्रुवम् ॥ ९ ॥

॥ इति श्रीमच्छन्कराचार्यविरचितम् कालभैरवाष्टकम् सम्पूर्णम् ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

॥ श्रीगङ्गाष्टकम् ॥

भगवति भवलीलामौलिमाले तवाम्भः ।
कणमणुपरिमाणम् प्राणिनो ये स्पृशन्ति ॥
अमरनगरनारीचामरग्राहिणीनाम् ।
विगतकलिकलङ्कातङ्कमङ्के लुठन्ति ॥ १ ॥

ब्रह्माण्डम् खण्डयन्ती हरशिरसि जटावल्लिमुल्लासयन्ती ।
स्वर्लोकादापतन्ती कनकगिरिगुहागण्डशैलात्स्खलन्ती ॥
क्षोणीपृष्ठे लुठन्ती दुरितचयचमूर्निर्भरं भर्त्सयन्ती ।
पाथोधिं पूरयन्ती सुरनगरसरित्पावनी नः पुनातु ॥ २ ॥

मज्जन्मातङ्गकुम्भच्युतमदमदिरामोदमत्तालिजालम् ।
स्नानैः सिद्धाङ्गनानां कुचयुगविगलत्कुङ्कुमासङ्गपिङ्गम् ॥
सायं प्रातर्मुनीनामं कुशकुसुमचयैश्छन्नतीरस्थनीम् ।
पायान्नो गाङ्गमम्भः करिकरमकराक्रान्तरं हस्तरङ्गम् ॥ ३ ॥

आदावादिपितामहस्य नियमव्यापारपात्रे जलम् ।
पश्चात्पन्नगशायिनो भगवतः पादोदकं पावनम् ॥
भूयः शम्भुजटाविभूषणमणिर्जह्नोर्महर्षेरियम् ।
कन्या कल्मषनाशिनी भगवती भागीरथी पातु माम् ॥ ४ ॥

शैलेन्द्रादवतारिणी निजजले मज्जज्जनोत्तारिणी ।
पारावारविहारिणी भवभयश्रेणीसमुत्सारिणी ॥
शेषाङ्गैरनुकारिणी हरशिरोवल्लीदलाकारिणी ।
काशीप्रान्तविहारिणी विजयते गङ्गामनोहारिणी ॥ ५ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

कुतो वीचिर्विचिस्तव यदि गता लोचनपथम् ।
त्वमापीता पीताम्बरपुरनिवासम् वितरसि ॥
त्वदुत्सङ्गे गङ्गे पतति यदि कायस्तनुभृताम् ।
तदा मातः शातक्रतवपदलाभोऽप्यलघुः ॥ ६ ॥

गङ्गे त्रैलोक्यसारे सकलसुरवधूधौतविस्तीर्णतोये ।
पूर्णब्रह्मस्वरूपे हरिचरणरजोहारिणि स्वर्गमार्गे ॥
प्रायश्चित्तं यदि स्यात्तवजलकणिका ब्रह्महत्यादिपापे ।
कस्त्वां स्तोतुं समर्थस्त्रिजगदघहरे देवि गङ्गे प्रसीद ॥ ७ ॥

भगवति तव तीरे नीरमात्रातनोऽहम् ।
विगतविषयतृष्णः कृष्णमाराधयामि ॥
सकलकलुषभङ्गे स्वर्गसोपानसङ्गे ।
तरलतरतरङ्गे देवि गङ्गे प्रसीद ॥ ८ ॥

मातः शाम्भवि शम्भुसङ्गमिलिते मौलौ निधायान्जलिम् ।
त्वत्तीरे वपुषोऽवसानसमये नारायणाङ्घ्रिद्वयम् ॥
सानन्दे स्मरतो भविष्यति मम प्राणप्रयाणोत्सवे ।
भूयाद्भक्तिरविच्युता हरिहराद्वैतात्मिका शाश्वती ॥ ९ ॥

गङ्गाष्टकमिदं पुण्यम् यः पठेत्प्रयतो नरः ।
सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥ १० ॥

॥ इति श्रीमच्छङ्कराचार्यविरचितं गङ्गाष्टकं सम्पूर्णम् ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

॥ श्रीविश्वनाथाष्टकम् ॥

गङ्गातरङ्गकमनीयजटाकलापम् ।
गौरीनिरन्तरविभूषितवामभागम् ।
नारायणप्रियमनङ्गमदापहारम् ।
वाराणसीपुरपतिं भज विश्वनाथम् ॥ १ ॥

वाचामगोचरमनेकगुणस्वरूपम् ।
वागीशविष्णुसुरसेवितपादपीठम् ।
वामेन विग्रहवरेण कलत्रवन्तम् ।
वाराणसीपुरपतिं भज विश्वनाथम् ॥ २ ॥

भूताधिपं भुजगभूषणभूषिताङ्गम् ।
व्याघ्राजिनाम्बरधरं जटिलं त्रिनेत्रम् ।
पाशाङ्कुशाभयवरप्रदशूलपाणिम् ।
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ३ ॥

शीतांशुशोभितकिरीटविराजमानम् ।
भालेक्षणानलविशोषित पञ्चबाणम् ।
नागाधिपारचितभासुरकर्णपूरम् ।
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ४ ॥

तेजोमयं सकलनिष्कलमद्वितीयम् ।
आनन्दकन्दमपराजितमप्रमेयम् ।
नादात्मकं सगुणनिर्गुणमस्वरूपम् ।
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ५ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

पञ्चाननं दुरितमत्तमतङ्गजानाम् ।
नागान्तकं दनुजपुङ्गवपन्नगानाम् ।
दावानलं मरणशोकजराटवीनाम् ।
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ६ ॥

आशां विहाय परिहृत्य परस्य निन्दाम् ।
पापे रतिं च सुनिवार्य मनः समाधौ ।
आदाय हृत्कमलमध्यगतं परेशम् ।
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ७ ॥

रागादिदोषरहितं स्वजनानुरागम् ।
वैराग्यशान्तिनिलयं गिरिजासहायम् ।
माधुर्यधैर्यसुभगं गरलाभिरामम् ।
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ८ ॥

वारणासीपुरपतेः स्तवनं शिवस्य ।
व्याख्यातमष्टकमिदं पठते मनुष्यः ।
विद्यां श्रियं विपुलसौख्यमनन्तकीर्तिम् ।
सम्प्राप्य देहविलये लभते च मोक्षम् ॥ ९ ॥

विश्वनाथाष्टकमिदं यः पठेच्छिवसन्निधौ
शिवलोकमवाप्नोति शिवेन सह मोदते ॥ १० ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

॥ श्रीगङ्गास्तोत्रम् ॥

देवि सुरेश्वरि भगवति गङ्गे त्रिभुवनतारिणि तरलतरङ्गे ।
शङ्करमौलिविहारिणि विमले मम मतिरास्तां तव पदकमले ॥ १ ॥

भागीरथि सुखदायिनि मातस्तव जलमहिमा निगमे ख्यातः ।
नाहं जाने तव महिमानं पाहि कृपामयि मामज्ञानम् ॥ २ ॥

हरिपदपाद्यतरङ्गिणि गङ्गे हिमविधिमुक्ताधवलतरङ्गे ।
दूरीकुरु मम दुष्कृतिभारं कुरु कृपया भवसागरपारम् ॥ ३ ॥

तव जलममलं येन निपीतं परमपदं खलु तेन गृहीतम् ।
मातर्गङ्गे त्वयि यो भक्तः किल तं द्रष्टुं न यमः शक्तः ॥ ४ ॥

पतितोद्धारिणि जाह्नवि गङ्गे खण्डितगिरिवरमण्डितभङ्गे ।
भीष्मजननि खलु मुनिवरकन्ये पतितनिवारिणि त्रिभुवनधन्ये ॥ ५ ॥

कल्पलतामिव फलदां लोके प्रणमति यस्त्वां न पतति शोके ।
पारावारविहारिणि गङ्गे विमुखयुवतिकृततरलापाङ्गे ॥ ६ ॥

तव चेन्मातः स्रोतःस्नातः पुनरपि जठरे सोऽपि न जातः ।
नरकनिवारिणि जाह्नवि गङ्गे कलुषविनाशिनि महिमोत्तुङ्गे ॥ ७ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

पुनरसदङ्गे पुण्यतरङ्गे जय जय जाह्नवि करुणापाङ्गे ।
इन्द्रमुकुटमणिराजितचरणे सुखदे शुभदे भृत्यशरण्ये ॥ ८ ॥

रोगं शोकं पापं तापं हर मे भगवति कुमतिकलापम् ।
त्रिभुवनसारे वसुधाहारे त्वमसि गतिर्मम खलु संसारे ॥ ९ ॥

अलकानन्दे परमानन्दे कुरु मयि करुणां कातरवन्द्ये ।
तव तटनिकटे यस्य हि वासः खलु वैकुण्ठे तस्य निवासः ॥ १० ॥

वरमिह नीरे कमठो मीनः किं वा तीरे शरटः क्षीणः ।
अथव श्वपचो मलिनो दीनः तव न हि दूरे नृपतिकुलीनः ॥ ११ ॥

भो भुवनेश्वरि पुण्ये धन्ये देवि द्रवमयि मुनिवरकन्ये ।
गङ्गास्तवमिममलं नित्यं पठति नरो यः स जयति सत्यम् ॥ १२ ॥

येषां हृदये गङ्गाभक्तिस्तेषां भवति सदा सुखमुक्तिः ।
मधुराकन्तापञ्झटिकाभिः परमानन्दकलितललिताभिः ॥ १३ ॥

गङ्गास्तोत्रमिदं भवसारं वाञ्छितफलदं विमलं सारम् ।
शङ्करसेवकशङ्कररचितं पठति सुखीस्तव इति च समाप्तः ॥ १४ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

॥ श्रीकाशीपञ्चकम् ॥

मनोनिवृत्तिः परमोपशान्तिः
सा तीर्थवर्या मणिकर्णिका च ।
ज्ञानप्रवाहा विमलादिगङ्गा
सा काशिकाहं निजबोधरूपा ॥ १ ॥

यस्यामिदं कल्पितमिन्द्रजालम्
चराचरं भाति मनोविलासम् ।
सच्चित्सुखैका परमात्मरूपा
सा काशिकाहं निजबोधरूपा ॥ २ ॥

कोशेषु पञ्चस्वधिराजमाना
बुद्धिर्भवानी प्रतिदेहगेहम् ।
साक्षी शिवः सर्वगतोऽन्तरात्मा
सा काशिकाहं निजबोधरूपा ॥ ३ ॥

काश्यां हि काश्यते काशी काशी सर्वप्रकाशिका ।
सा काशी विदिता येन तेन प्राप्ता हि काशिका ॥ ४ ॥

काशीक्षेत्रं शरीरं त्रिभुवनजननी व्यापिनी ज्ञानगङ्गा
भक्तिः श्रद्धा गयेयं निजगुरुचरणध्यानयोगः प्रयागः ।
विश्वेशोऽयम् तुरीयः सकलजनमनस्साक्षिभूतोऽन्तरात्मा
देहे सर्वं मदीये यदि वसति पुनस्तीर्थमन्यत्किमस्ति ॥ ५ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

॥ श्रीचन्द्रशेखराष्टकम् ॥

चन्द्रशेखर चन्द्रशेखर चन्द्रशेखर पाहि माम् ।
चन्द्रशेखर चन्द्रशेखर चन्द्रशेखर रक्ष माम् ॥ १ ॥

रत्नसानुशरासनं रजताद्रिशृङ्गनिकेतनम्
शिञ्जिनीकृतपन्नगेश्वरमच्युताननसायकम् ।
क्षिप्रदग्धपुरत्रयं त्रिदिवालयैरभिवन्दितम्
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ २ ॥

पञ्चपादपपुष्पगन्धपदाम्बुजद्वयशोभितम्
भाललोचनजातपावकदग्धमन्मथविग्रहम् ।
भस्मदिग्धकलेवरं भवनाशनं भवमव्ययम्
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ३ ॥

मत्तरावणमुख्यचर्मकृतोत्तरीयमनोहरम्
पङ्कजासनपद्मलोचनपूजिताङ्घ्रिसरोरुहम् ।
देवसिन्धुतरङ्गसीकरसिक्तशुभ्रजटाधरम्
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ४ ॥

यक्षराजसखं भगाक्षहरं भुजङ्गविभूषणम्
शैलराजसुतापरिष्कृतचारुवामकलेवरम् ।
क्ष्वेडनीलगलं परश्वधधारिणं मृगधारिणम्
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ५ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

कुण्डलीकृतकुण्डलेश्वरकुण्डलं वृषवाहनम्
नारदादिमुनीश्वरस्तुतवैभवं भुवनेश्वरम् ।
अन्धकान्धकमाश्रितामरपादपं शमनान्तकम्
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ६ ॥

भेषजं भवरोगिणामखिलापदामपहारिणम्
दक्षयज्ञविनाशनं त्रिगुणात्मकं त्रिविलोचनम् ।
भुक्तिमुक्तिफलप्रदं सकलाघसङ्घनिबर्हणम्
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ७ ॥

भक्तवत्सलमर्चितं निधिमक्षयं हरिदम्बरम्
सर्वभूतपतिं परात्परमप्रमेयमनुत्तमम् ।
सोमवारिजभूहुताशनसोमपानिलखाकृतिम्
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ८ ॥

विश्वसृष्टिविधायिनं पुनरेव पालनतत्परम्
संहरन्तमपि प्रपञ्चमशेषलोकनिवासिनम् ।
क्रीडयन्तमहर्निशं गणनाथयूथसमन्वितम्
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ९ ॥

मृत्युभीतमृकण्डुसूनुकृतस्तवं शिवसन्निधौ
यत्र कुत्र च यः पठेन्न हि तस्य मृत्युभयं भवेत् ।
पूर्णमायुररोगितामखिलार्थसम्पदमादरम्
चन्द्रशेखर एव तस्य ददाति मुक्तिमयत्नतः ॥ १० ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

स्थपनम् : १९९३

प्रकाशितग्रन्थाः

०१. कन्नडसन्ध्याभाष्यम्
०२. सन्ध्यावन्दनम्
०३. पञ्चायतनदेवपूजा
०४. विष्णुप्रोक्तशिवसहस्रनाम
०५. आदित्यादिनवग्रहपूजाविधिः
०६. श्रीरामचरितामृतम्*
०७. मन्त्रमञ्जरी
०८. वैदिकानुबन्धसमुच्चयः
०९. शारदाराधनम्
१०. अग्निमुखप्रकाशः*
११. ज्यौतिषसंवादः*
१२. श्रीदुर्गापूजाविधिः*
१३. नित्योपासनपद्धतिः*
१४. वैदिकसम्भारः
१५. श्रीसत्यनारायणव्रतकथा (कन्नड षट्पदी)
१६. वेद-वेदाङ्गपरिवारः
१७. भगवत्पाद श्रीआदिशङ्कराचार्यरु*
१८. श्री सत्यगणपतिव्रतविधिः
१९. श्री वरदशङ्करपूजाविधिः
२०. श्लोकसमाहारः सं-१
२१. श्लोकसमाहारः सं-२
२२. पुराणलोकः
२३. पुराणयानम्
२४. श्रीगङ्गाकल्पोक्तपूजाविधिः (कन्नडलिपिः)
२५. श्रीगङ्गाकल्पोक्तपूजाविधिः (संस्कृतलिपिः)

* समाप्ताः

वैदिकशिक्षणं, संस्कृतशिक्षणं, तथेऽतरसांस्कृतिकविषयाणां शिक्षणं, तत्सम्बन्धिकार्यं, ग्रन्थप्रकाशनं, विद्वत्सम्मननं, संस्कृतप्रतिभापुरस्कारः, प्रवचनमित्यादि ध्येयोद्देशार्थं ब्रह्मश्री मित्तूरु पुरोहित तिम्मय्य भट्ट सम्प्रतिष्ठानं १९९३ तमे वर्षे प्रतिष्ठापितम् ।

वैदिकसांस्कृतिकविचारसम्बन्धी ग्रन्थप्रकाशनमपि वर्तते । कार्येऽस्मिन् आर्थिकतया बौद्धिकतया च सहकृतानां महनीयानां सम्प्रतिष्ठानं कृतज्ञतां समर्पयति ।

आसक्तमहाजनाः सम्प्रतिष्ठानात् प्रकाशितग्रन्थानां सदुपयोगं कुर्वन्त्विति सविनय प्रार्थना । सम्प्रतिष्ठानस्य सदस्याः भवितुं सदवकाशो वर्तते ।

ब्रह्मश्री मित्तूरु पुरोहित तिम्मय्य भट्ट सम्प्रतिष्ठानम् (रि.)

अनूचाननिलयः, ग्रामः इड्किदु-५७४ २२०, बण्ट्वालतालूकः, द.क., कर्णाटकः

स्थिर दूरवाणी : 08251-281101

चर दूरवाणी : +91 9483355101 / +91 7760517101

ईमैल् : samprathishtaana@gmail.com

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Late Mittur Purohit Thimmayya Bhat was born in 1904 to late Mittur Krishna Bhat and Shrimathi Saraswathi Amma in the illustrious Alangar family, known for its rich vaidik culture and tradition. He had his early vaidik education under his father. He then studied Samskritha under his uncle late Mittur Narayana Shastry, who was a scholar in astrology and grammar as well. The renowned Palghat Narayana Jata Vallabh taught him the finer aspects of veda. Mittur Thimmayya Bhat than graduated himself into a purohit with an in-depth knowledge of vaidik tradition and practice. Large number of havyak families in and around Puttur taluk regarded him as their purohit.

Mittur Thimmayya Bhat was a purohit par excellence, with simplicity personified. He would perform religious duties for his disciples with utmost dedication and commitment. He was greatly respected and held in high esteem by his disciples for his loyalty to profession and selfless attitude. He was an ideal purohit in every sense of the term. He was a role model to younger purohits. They would often look up to him for guidance and encouragement. He would mix freely with the rich and the poor, with old and the young with equal felicity.

Mittur Thimmayya Bhat lived his life to the full and attained his heavenly abode at the ripe old age of 82 in 1986, leaving behind a rich legacy. To propagate his ideals for which he stood for during his lifetime, his innumerable disciples and well-wishers joined hands to establish Brahmashree Mittur Purohit Thimmayya Bhatta Samprathishtaana in 1993 with a working committee consisting of 12 members. Samprathishtaana has published 24 books so far on a variety of religious topics. This particular book **'Shree Ganga Kalpokta Pooja Vidhih'** is its 25th product and its first in Samskritha language. Samprathishtaana expects same kind of patronage from its well-wishers as shown to its earlier offerings.



Sri Vidyabharathi Book Centre, Sringeri